अथकर्मविपाकप्रारम्भः

कर्म
१

श्रीगणेशाय नमः अथ कर्मविपाकसंहितायां पुस्तकविधिः रविवारे चार्के ज्ञानो शुभे योगे तथा विधौ वे २ नो चव्यतीपाते विप्राणां च गृहाश्रमे १ देवता
पतने चैव नद्यां वै संगमोत्तमे अथवा स्वगृहे चैव शुभे स्थाने विशेषतः २ स्नानं समाचरेद्रोगी मृतपुत्रोऽप्यपुत्रकः कर्मणा पीडितो योऽसौ नारी वा पुरुषोपि वा ३
धात्री फलानि लोध्रं च गोमयं तिलसर्षपाः मृत्तिका समकर्पूरमुशीरं पुष्पसंयुतम् ४ औषधी सम भागैश्च स्नानं कुर्यात्प्रयत्नतः देवान्पितॄंश्च संतर्प्य
सूर्यार्घ्यं च तथा दिशेत् ५ अद्येहे त्यादि प्राचीनसंचितकर्मावलोकनार्थं मनः कामनासिद्ध्यर्थं श्रीविष्णोः पूजनपूर्वकं कर्मविपाकपुस्तकपूजनमहं करिष्ये न्या
सपूर्वकं षोडशोपचारपूजां करोमि पश्चात्संकल्प वैश्वदेवश्राद्धं करोमि अन्नान्तरे देहशुद्ध्यर्थं पुरश्चरणं गत्वेन गोमिथुनदानं घृतकुंभदानं च प्रजाप
ति तुष्ट्ये षोडश ब्राह्मणान्भोजयेत् भोजनानन्तरं प्रार्थना आचार्यस्य ब्राह्मणस्य महाभाग भूमिदेव द्विजोत्तम शास्त्रार्थं च परिज्ञाय प्राचीनं च शुभाशुभम् ६
कर्ममेकस्य स्वामिन् कृपां कृत्वा ममोपरि एवं च ब्राह्मणाचार्य्यं नमस्कृत्य प्रसादयेत् ७ दश पंच तथा विप्रानुपवेश्य द्विजान्शुभान् तेषामनुज्ञया स
वि प्रापश्चितमुपक्रमेत् ८ वस्त्रालंकरणैराचार्यं पूजयित्वा प्रजापतिस्वरूपं गुरुं प्रार्थयेत् प्रजापते महाबाहो वेदवेदांगपारगः पुत्रकामसमृद्ध्यर्थं पू
जां गृहाण नमोऽस्तु ते ९ विष्णो त्वं पुण्डरीकाक्ष भुवनानां च पालकः हृद्लक्ष्म्या हृषीकेश पूजां गृहाण नमोऽस्तु ते १० रुद्र त्वं देवनाशाय सदा भस्मांगधारकः
नागयज्ञोपवीताय पूजां गृहाण नमोऽस्तु ते ११ सर्वे सुराश्च गंधर्वाः पाताले पन्नगादयः मर्त्यलोके मनुष्याश्च संध्यायन्ति च भास्करं १२ महापद्मादिको
होमश्चाग्निहोत्रादिकर्म च तीर्थस्नानं तथा ध्यानं वर्तते भास्करो दयात् १३ ब्रह्मा विष्णुः शिवः शक्तिर्देवदेवमुनीश्वरः ध्यापति भास्करं देवं साक्षिभूतं
जगत्रय १४ ब्रह्मा च त्वं च वेदि विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः त्वमग्निस्त्वं वषट्कारस्त्वामाहुः सर्वदेवताः १५ योगिनां परमो ध्येयो यो पत्नीनां ब्रह्मचारिणा
म् आधिव्याधिप्रहर्ता त्वं सर्वपापक्षयंकरः १६ दीनानां कृपणानां च प्राणिनां व्याधिनाशनः एवं च भास्करं ध्यात्वा नमस्कृत्य प्रसादयेत् १७ अपुत्र
कः पापी चैव दुराचारी परनिंदापहारकः ब्रह्महा हेमहारी च सुरापी गुरुतल्पगः १८ स्त्रीहंता बालघाती च अगम्यागमनेन च एवमादीनि
पापानि मया वै पूर्वजन्मनि १९ कृतानि विविधान्येव सर्वाणि ष्टानि वै मया ममोपरि कृपां कृत्वा सत्यं त्वं कथय प्रभो २० लग्नं तात्कालिकं कृत्वा ज
न्मपत्रं निरीक्ष्य वा लग्ने पत्रविचारेण ज्ञातव्यं कर्म मानुषम् २१ प्रश्नावलि विचारेण ज्ञातव्यं शास्त्रपारगैः ॥ इति प्रथमोऽध्यायः १ कैलासशिखरे रम्ये

सुरासीनं महेश्वरम् २२ प्रणम्य पार्वती भक्त्या संप्रपच्छ सदाशिवं पार्वत्युवाच देवदेव जगन्नाथ भक्तानुग्रहकारक लोकोपकारकं प्रश्नं वदस्व प
रमेश्वर २३ कलौ च मानवास्सर्वे पापयोगसमन्विताः महारोगग्रहग्रस्ताः कन्यापुत्रविवर्जिताः २४ कुत्सिता रूपविभ्रष्टा मृतवत्सा नपुंसकाः नारी
णां पुरुषाणां च पूर्वकर्म च यत्प्रभो २५ तत्सर्वं वद मे स्वामिन् सर्वज्ञोऽसि मतो मम एतत् श्रुत्वा वचो देव्याः प्रीतिमान् स महेश्वरः २६ प्रहस्य च जग
न्नाथो वल्लभां प्रीतिसंयुतां उवाच प्रश्नं भगवाँल्लोके लोक्ये वापि दुर्लभम् २७ श्रीशिव उवाच शृणु त्वं गिरिजे देवि नृणां कर्मविशेषतः कथया
मि न संदेहः श्रवणाय दृढा मतिः २८ यतः सर्वं जगज्जातं चराचरं जलं भुवम् स्वकर्मणा ततो देवि भुज्यते देवमानवैः २९ मानुष्यैश्च विशेषेण स्वक
तं कर्म भुज्यते कर्मनयं च सर्वेषां तन्नाथेस्सं चितं च यत् ३० कर्तव्यं नात्र संदेहो यत्कृत्वा फलभाक् पुनः प्रारब्धं विस्तरं कर्म वर्तमानं च दृश्यते ३१
अश्विन्यादिषु नक्षत्रे सर्वेषां जन्म जायते तदादिपदभेदेन ज्ञातव्यं च शुभाशुभम् ३२ इति कर्मविपाकसंहितायां पार्वतीहरसंवादे प्रथमोऽध्या
यः १ श्रीशिव उवाच अश्विन्याः प्रथमे पादे पुरा जन्म च जायते तदा ब्राह्मणवर्णोऽपि मध्यदेशसमुद्भवः ३३ द्वितीयचरणे देवि पुरा सन्नी
न चान्यथा अयोध्यापुरतः पूर्वं पुत्रकन्याविवर्जितः ३४ तृतीयचरणे देवि वैश्यो धनसमन्वितः रोगी कुत्सितवर्णोऽयं मृतवत्सो नपुंसकः ३५ च
तुर्थचरणे देवि यदा भवति मानवः तदा शूद्रं विजानीयाद्रोगवान्मृतवत्सकः ३६ श्यामलं कृष्टदेहं च वातरोगेण संयुतः इति कर्मविपाकसं
हितायां अश्विनीनक्षत्रस्य सामान्यफलकथनं नाम द्वितीयोऽध्यायः २ श्रीशिव उवाच अथ कर्म प्रवक्ष्यामि यत्कृतं ब्राह्मणादिभिः एको
ब्राह्मणो वेदज्ञो गुणरूपसमन्वितः १ तस्य पत्नी विशालाक्षी पुंश्चली सत्रवं शज्ञा तस्याः पुत्रो भवेद्देवि नाम्ना नरहरिः सुतकः २ ब्रह्मकर्मपरिभ
ष्टो व्याघ्ररूपी महाबलः तस्य पत्नी लोकपतिपतिवंचनतत्परा ३ प्रत्यहं मृगयां याति मृगमांसेन जीवति निर्दयो धर्मविभ्रष्टः शास्त्रसूत्ररतो न म
संशयः ४ तस्य मित्रो द्विजोऽप्येको धनपुत्रेण संयुतः नाम्ना तोलग्रशर्मेति निकटे तस्य चागतः ५ आदरं बहुधा कृत्वा स्वर्णं दृष्ट्वा महा
वित्तः स्वर्णलोभेन सो विप्रो हन्ति तं पुत्रसंयुतः ६ स्वर्णं सर्वं हृतं देवि व्ययं कुर्याद्दिने दिने षडंशं गुप्तदानं च गंगायमुनसंगमे ७ एवं ब
हुगते काले पत्नी तस्य मृता पुरा पश्चात् सोऽपि ग्रहग्रस्तो मरणं तस्य जायते ८ निक्षिप्तो नरके घोरे यमदूतैर्यमाज्ञया युगानां सप्ततिपर्यन्तं भू

लो नरकं जं भयमूः ९ नरकान्निःसृतो देवि म्लेच्छगालो गहने वने नततो निष्फलं भुक्त्वा कृमियोनिं ततो गमत् १० पुनर्मानुषयोनिं च तुरगे प्रथमे पदे म
२ ध्यदेशोद्भवे ग्रामे मृतवत्सा स्वपुत्रकः ११ रूपेणो बहुधना यश्च गवां मांसप्रियः सदा तस्य भार्या महालुब्धा पुरा लुब्ध मती च या १२ पुनर्विवाहि
ता देवि पूर्वजन्मप्रसंगतः मासि पुष्पं भवेत्तस्याः संततिर्नैव जायते १३ सत्वरा दीर्घनेत्रा च कुक्षिपीडा सत्याधिका इति श्रुत्वा वचस्तस्या महादेव प्रि
या शिवा १४ प्रणाम्य पार्वती देवी मिष्टं मोक्षं प्रभुज्यते रोगतश्च वृषा सर्वज्ञेयं सर्वं शुभाशुभम् १५ राजरोगी भवेद्यस्तु ब्रह्महा पूर्वजन्मनि पुत्रकन्यावि
हीनश्च गोत्रहा गुरुहा तथा १६ पाण्डुरोगी नरो यस्तु देवपूजनवर्जितः कन्यापत्यं भवेत्तस्य वेदनिन्दा कृता पुरा १७ द्विष्टा दीर्घरोगी च गोवधी
च परदारा पुरा कन्याघाती पक्षिघाती तस्य भार्या न जीवति १८ भ्रातृहा यः पुरा देवि सज्वरो वप्रपीडितः घंटावादित्रहारी च कण्ठरोगी नरो भ
वेत् १९ भगिनीगमने देवि कृते ये पूर्वजन्मनि तेन पापेन भो देवि चर्मरोग रज्जता भवेत् २० मित्रद्रोही बालघाती पशुघाती तथैव च तस्कलेन म
हादेवि मृतवत्सश्च रोगवान् २१ कन्याघाती गर्भघाती वा यः पुस्तकहारकः जन्मान्धो जायते देवि नात्र कार्या विचारणा २२ वस्त्रहा भूमिहारी च
परनिन्दापहारकः तेन पापेन भो देवि दरिद्रो जायते नरः २३ गोत्रदारापहारी च दीर्घरोगी भवेन्नरः महिषीपुत्रघाती च कंपरोगः प्रजायते २४ नि
वीजं वृषभं यस्तु प्रकरोति नराधमः षंढत्वं जायते देवि मूत्रकृच्छ्रं भवेत्ततः २५ मातृहा पितृहा देवि महाकुष्टी भवेन्नरः अगम्यागमनं यस्तु
वीर योषां गमं तथा २६ शरीरे सततं देवि ज्वरेण पीडितो नरः गोवधी यो नरो देवि श्वेतकुष्ठी नरः सदा २७ कन्यकागमनं यस्तु करोति हठतः पुरा
तेन पापेन भो देवि रोगवान् धनवर्जितः २८ पुष्पगंधापहारी च मुखे चैव प्रगंधता घनहारी भवेत्कुष्टी तस्माद्दृष्टः कृमिर्भवेत् २९ दृष्ट्वा गन्धापहा
री च खण्डको जायते नरः वाटिकाकूपहारी च दद्रुरोगी भवेन्नरः देवधान्यापहारी च कफरोगी भवेन्नरः ३० सारंगीगीतघाती च वने दावाग्निद
हकाः चक्षुरोगी नासिकापात्रको कृमिर्जायते ३१ तैलहारी भवेत्तेली गुडहारी व्रणी सदा स्वर्णरौप्यापहारी च नरो भवति पुत्रहा ३२ दासदा
सीहरी पलकर्णरोगी भवेन्नरः लौहमात्यहरो यस्तु कुष्ठिरोगी प्रजायते ३३ अग्निदाही वस्त्रहारी वा हरोगी प्रजायते मयूरकुक्कुटानां च कच्छपानां
च घातकः ३४ वातरोगी च खंजश्च जन्मजन्म नपुंसकः मद्यपी मांसहारी च मत्स्यभोगी तथैव च ३५ तेन पापफलाद्देवि चर्मकारो हि जायते अन्न

तु लहांश्चैव दन्तरोगी तदा भवेत् ३६ ब्राह्मणस्य गृहे वित्तं धनधान्यसमन्वितम् हरणं यो हि वै कुर्यान्मर्गीरोगी न संशयः ३७ एवं बहुविधो रोगो नरा
णां चैव जायते पूर्वकर्मफलेनैव भुज्यते चैव मानवैः ३८ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे तृतीयोऽध्यायः ३ श्रीशिव उवाच शृणु देवि प्र
वक्ष्यामि पत्रस्य सम्भविदुर्लभम् प्रायश्चित्तं नराणां तु मेषराशिक्रमाच्छृणु १ ब्राह्मणं स्वर्णलोभेन निहतं पुत्रसंयुतं स्वर्णभृकुसदारेण नाशाने वज्ञातकः २
प्रायश्चित्तं जपादि विनायन्नीत्यवकथयाम् ततः पंचलक्षप्रमाणेन ततः पापात्प्रमुच्यते ३ ब्राह्मणस्य सपुत्रस्य प्रतिमां कारयेत्ततः स्वर्णपलदशस्यैव ततः
पूजां प्रयत्नतः ४ कुण्डं कृत्वा ततो देवि चतुरस्रं प्रसन्नतः प्रतिमां पूजयेद्देवि मन्त्रेणानेन भो प्रिये ५ ॐ नमो गणाधिपतये गंध पुष्पादि बलिं समर्पयामि
नमः ॐ सूर्याय नमः ॐ इन्द्राय नमः ॐ अग्नये नमः ॐ यमाय नमः ॐ निर्ऋतये नमः ॐ वरुणाय नमः ॐ अनन्ताय नमः ॐ गरुडाय नमः ॐ वायवे नमः
ॐ कुबेराय · ॐ ईशानाय · ॐ ब्रह्मणे · ॐ विष्णवे · ॐ जयाय · ॐ विजयाय · ॐ पुण्यशीलाय · ॐ सुशीलाय · सर्वे देवाः सुराः सर्वे ब्रह्मविष्णुमहेश्वराः
मम पापं पुरा जातं तत्सर्वं क्षम्यतां सदा इमां पूजां गृहाण त्वं मम सुपुत्रं प्रयच्छतु अज्ञानाद्वा प्रमादाद्वा यत्कृतं पूर्वजन्मनि ७ तत्सर्वं क्षम्यतां देव प्रपद्ये
शरणं तव ततो नवग्रहाः सर्वे दिक्पालाश्च व्यापकग्रहाः ८ सर्वे मम अपराधानि क्षम्यतां पूर्वजन्मनि एवं सर्वं यथान्यायं पूजां कृत्वा विचक्षणः ९ ततो
होमं प्रकुर्वीत तिलधान्यादि तण्डुलैः दशांशं होमतो देवि तर्पणं मार्जनं तथा १० गोदानं च ततः कुर्यात् दशवर्णां विशेषतः वृषमेकं प्रदातव्यं स्वर्णशृंग
ग्रहमहारवम् ११ ततो वै ब्राह्मणान् देवि भोजयेद्विधिपूर्वकम् भोजनान्ते ततो दानं सुवर्णदक्षिणां ततः १२ प्रतिमां तु कृत्वा देवि वाचकाय प्रदापयेत् एवं
कृते महादेवि वंशो भवति नान्यथा १३ एकादशीव्रतं चैव सप्तमी रविसंयुता आजन्ममरणाद्देवि कुर्यात्स सुतो नरः १४ पूर्वपापविशुद्धिः स्याद्व्या
धिश्चैव विनश्यति इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे प्रथमपादप्रायश्चित्तो नाम चतुर्थोऽध्यायः ४ श्रीशिव उवाच अथ द्वितीयं व
क्ष्यामि प्रायश्चित्तं तथा प्रिये अश्विन्यां जायते देवि पूर्वकर्मविपाकजान् १ अयोध्यापुरतो देवि पूर्वकोशचतुष्टये सरय्वा निकटे देवि वर्णशं
करः क्षत्रियः २ नामतश्चैत्रसिंहेति पुत्रदारसमन्वितः एकदा मातुलो देवि पुत्रेण सह संयुतः ३ आगतो निकटे तस्य स्वर्णकोटिसमन्वितः आद
रं बहुधा दत्त्वा गृहे वासं ददाति सः तस्य पत्नी गुणवती रूपयौवनसंयुता मासमेकं तदा देवि स सहं भगिनीगृहे ५ भुक्तं च सह पुत्रेण चाग्निबवि

कर्म० विध्वंसस्य मासान्ते चावधीद्विप्रो मातुलं पुत्रसंयुतम् ६ भूमिमध्ये शवौ तावंशाल्लत्तः स्थापितः सदा स्वर्णकोटिं प्रजग्राह पापात्मा गुरुघातकः ७ पु
३ त्रस्य हन्तुस्ततो द्रव्यं व्ययं कृत्वा दिने दिने स्वं वहु तिथौ काले स्त्री कालवशोऽभवत् ८ पश्चान्मृतास्ततः पत्नी निर्जने गहने वने कर्दमे नरके घोरे यमदू
तैर्यमाज्ञया ९ निक्षिप्य महतीं पीडां तयोर्दत्वा ततः प्रिये युगमेकं वरारोहे भुक्त्वा नरकयातनाम् १० नरकान्निःसृतो देवि गर्दभत्वमजायत प्रथमः सुरदे
यो निजभुक्त्वा मर्त्यस्ततोऽभवत् ११ अवधीद्यः पुरा देवि मातुलं पुत्रसंयुतम् तत्पापफलतो देवि वंशच्छेदो भिजायते १२ रोगयुक्तोऽभवद्देवि विप
त्नी पूर्वजन्मनि पुनर्विषाहितादेवि न तो वै पूर्वकर्मतः १३ कासश्वाससमायुक्तो विषमज्वरसंयुतः प्रायश्चित्तं ततस्तस्य प्रवक्ष्यामि द्विया
निधि १४ षडंशं ब्राह्मणे दानं भक्तिपूर्वं वरानने दशधेनुः प्रदातव्या हरिवंशश्रवणं तथा १५ सुवर्णप्रतिमां कृत्वा पलपंचदशस्य तु वरुणत्वा।
कारकं कुण्डे वै होमं कुर्यात्प्रसन्नधीः १६ गायत्रीमन्त्रजापं च लक्षमेकं तु कारयेत् दशांशहोमः कर्तव्यो विशेषेण प्रसन्नधीः १७ शेषाद्दानं वि
शेषेण प्रतिमापूजनं ततः अथ प्रतिमापूजनम् षोडशांगुलवैस्तिर्णं मल्लिकासम संयुताम् चतुरस्रां विचित्रां च गंधपुष्पसमन्विताम् १८ ततोऽपि प्रति
मां देवि स्थापितां पूजयेत्ततः गंधपुष्पोपहारैश्च ताम्बूलैर्विविधैस्तथा १९ धूपदीपैः सनैवेद्यैरावाहनविसर्जनैः मंत्रेणानेन भो देवि पूजयेन्नामभिस्ता
तः ॐ चक्रधराय नमः ॐ गदाधराय ॐ शार्ङ्गिणे ॐ गरुडाय ॐ विष्णवे ॐ शिवाय ॐ ब्रह्मणे ॐ प्रजापतये ॐ सर्वेश्वराय ॐ देवदेव म
हादेव शंखचक्रगदाधर मम पूर्वकृतं पापं हर मे धरणीधर २१ एवं पूजां समाप्यैव प्रतिमां च दापयेत् आचार्याय ततो देवि सुवर्णं दक्षिणां त
तः २२ ततः प्रदक्षिणां कुर्यात्गुरवे व्यासरूपिणे माघमासि प्रयागे तु स्नानं पत्नीसमन्वितः २३ एवं कृते न संदेहो वंशोऽभवति नान्यथा मृतवत्सा ल
भेत्पुत्रं वंध्यात्वं च प्रणश्यति २४ रोगी चेन्मुच्यते रोगात्कन्या कान्ते न जायते इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे द्वितीयचरणे प्रा।
यश्चित्तो नाम पंचमोऽध्यायः ५ श्रीशिव उवाच अथातः संप्रवक्ष्यामि नक्षत्रं तुरगस्य तु तृतीयचरणे देवि प्रायश्चित्तमतः शृणु १ अयो।
ध्यानगरे देवि दक्षिणे पूर्वदिग्भवे नारायणपुरे श्रेष्ठे राजपुत्रो वसत्सदा स्वकर्मनिरतो दानी प्रजापोषणतत्परः नामतः श्रीलसिं
हेति तस्य पत्नी प्रभावती ३ तस्य मित्रो द्विजोऽप्येकः स्वकर्मपरिवर्जितः एकदा मृगयायां तौ राजपुत्रः स ब्राह्मणः ४ मृगं हत्वा वरारो

देगच्छन्तोगहनेवने मांसस्य देवि मार्गार्थंब्राह्मणोदुर्दैवाच्चाऽवदत् ५ ततोब्राह्मणंदुष्टात्माक्रोधेनाप्यपिवद्धित्वम् मरणंतस्यभोदेविगहनेगह्वरेवनेहतंतंभ
क्षिंतापरीतात्माराजपुत्रोगृहंययौ गृहंचकारयामासतस्यकर्मयथाविधि ७ ततोवहुतिथिकालेप्रयागेसहदंपत्नीशरीरंसक्तवान्देविमाघमासहितस्तदा ८
स्वर्गंभुक्तंयुगानस्तत्ततःपुण्यक्षयेसतिमर्त्यलोकेऽभवज्जन्मधनधान्यसमन्वितः ९ भार्यया सहितोदेविमध्यदेशेवराननेपुत्रोनजायतेदेविपूर्वकर्मवि
पाकतः १० ब्रह्महत्याफलं देविमृतवत्सात्वमाप्नुयात् तस्यशुद्धिंप्रवक्ष्यामिततःपुत्रःप्रजायते ११ तदुद्देशेनकर्त्तव्यंतडागंवापिकापथिहरिवंश
श्रवणंदेविविधिपूर्वमतःशिवे १२ दशवर्णांप्रदातव्यास्वर्णयुक्तासहाम्बराएवंकृतेनसंदेहोवंशस्तस्यप्रजायते १३ काकवंध्यात्वमप्येतमृतवत्सा
सुतावतिव्याधिनाशोभवेद्देविनात्रकार्याविचारणा १४ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेऽश्विनीनक्षत्रस्यतृतीयचरणेप्रायश्चि
त्तंनामषष्ठोऽध्यायः ६ श्रीशिवउवाच शृणुदेविवरारोहेनृणांकर्मविपाकजं तदहंसंप्रवक्ष्यामीयथाकर्मानुसारतः १ पुत्रावहुविधादे
विलोकिकवेविचक्षणेः जायतेनात्रसंदेहस्तत्सर्वंशृणुवल्लभे २ प्रथमेपुण्यसंबंधेमातृपितृप्रियःसदा सुसेवानिरतोनित्यंपितृमातृधनंय
लतः ३ आजन्ममरणाद्देविपितुराज्ञांचकारयेत् मरणेमातृपित्रोश्चश्राद्धंकुर्याद्दिनेदिने ४ पितृश्राद्धंविनादेविभोजनंनैवकारयेत् द्वितीयंश
त्रुसंबंधेन स्पचेष्टांचमेशृणु ५ पूर्वजन्मप्रसंगेनशत्रुपुत्रःप्रजायतेजन्मतःशत्रुरूपेणमातृपित्रोर्विरुद्धता ६ नीत्वाकर्मक्रियेनिसंताभ्यांलेशोमि
जायतेतृतीयमृणसंबंध मतःशृणुवरानने ७ ऋणंपरस्यगृहितंतुनदत्तंहठतःप्रिये तदापुत्रत्वमाप्नोतिद्रव्यदातानसंशयः ८ पितुर्द्रव्यंप्रय
त्नेनगृह्णातिहठतःप्रियेघृतद्रव्यप्रदानेनव्ययंकर्पाद्दिनेने ९ पदाद्द्रव्यविहीनश्चपितुर्भवतिचानघे तदावैमरणंयातियुवारूपोनसंशयः
१० चतुर्थंमित्ररूपंचगृहेद्रव्यंचसंस्थितम् स्थापितंद्रव्यमन्यस्यनदत्तंपूर्वजन्मनि ११ ततःसंबंधरूपेणपुत्रोजातस्तदाशिवेवद्धप्रिय
श्चपितृभ्यांपितृव्येगोनजेत्तथा १२ वहुधर्मीगुणीभोक्तापितृशिक्षाच तत्सदः यत्करोतिगृहेकर्मसुखंदजायतेततः १३ एवारूपायदादेवि
पत्नीपुत्रसमन्वितःतदाशरीरंवैसत्काधनंगृह्यततःप्रिये १४ प्रवक्ष्यामिततोदेविचतुर्थचरणेशिवेनक्षत्रंतुरगःस्येवप्राणिनांनियतःश्व
णु १५ कोशलापुरतोदेविशरय्वाउत्तरेतटेतत्रक्षत्रीवसत्येकोनगरेनहैनतथा १६ सत्यधर्मविहीनश्चलक्षणोतिचसंज्ञकः तस्यभार्याविशाला
क्षीकल्याणीनामसाप्रिये १७ कुलरूपयौवनान्वितापरप्रसितासहा व्यापारंक्रियतेनित्यंधनवस्त्रविभूषिता १८ उग्रमंकुरुतेनित्यंद्विजैःसह

कर्म वरानने एवं बहुगते काले विप्रद्रव्यं च चोरितः १९ तेन शोकेन सोदिप्रः शीघ्रं पंचत्वमाप्नुयात् ततो बहुतिथे काले राजपुत्रस्य पंचत्वात् २० गतं स नरके
८ घोरे निरुच्छ्वासं सुदारुणं षष्टिवर्षसहस्राणि भुक्ता नरकयातनाम् २१ नरकान्निःसृतो देवि वकयोनिं प्रागभवत् ततो वै राजपुत्रस्तु मातृघत्वं भवा
प्नुयात् २२ पूर्वैवमत्कृतं कर्म इह वैतत्प्रभुज्यते मित्रद्रव्यात् तदा देवि पुत्रस्ये वस्तुपंचता २३ काकवंध्या भवेत्पत्नी पुत्रशोकसमन्विता तस्य पुण्यप्रवक्ष्या
मी पूर्वपापस्य विग्रहम् २४ गायत्रीलक्षजाप्येन सर्वं पापं विनश्यति कृष्णांडनारिकेरं च स्वर्णयुक्तं सहाम्बरम् २५ गंगामध्ये प्रदातव्यं संतानाय
वरानने वर्तुलाकारके कुण्डे होमं वै कारयेत्ततः २६ स्वर्णशृंगीं रौप्यखुरां पट्टवस्त्रविभूषिताम् आचार्याय प्रदातव्यं सपात्रं विधिवत्प्रिये २७
एवं कृते न संदेहो वंध्यात्वं च प्रणश्यति पुत्रपौत्रप्रवर्द्धते संदेहो न वरानने २८ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे अश्विनीनक्षत्रस्य चतु
र्थचरणे प्रायश्चित्तो नाम सप्तमोऽध्यायः ७ पार्वत्युवाच देवदेव महादेव सृष्टिस्थितिलयांतक स्त्रीणां कर्म च संब्रूहि कृपां कृत्वा ममोपरि १
श्रीशिव उवाच नारीणां शृणु मे पापं पत्स्कृतं पूर्वजन्मनि नृतो हंसप्रवक्ष्यामि कथ्यपामीव रानने २ पूर्वजन्मनि तत्तेह पतिनिन्दां स्वकारयेत् तेन
पापेन भो देवि नष्टपुष्पवती भवेत् ३ यद् रौप्यस्य वै हस्ते सागाष्टपरीमाणकम् पलं पंचमितं देवि दद्याद् द्विजे विद्वदेवि ४ तदा पुष्पं भवेद्देवि ।
नात्र कार्या विचारणा पतिं सुप्तं परित्यज्य परपुंसि रता गता ५ तेन पापेन भो देवि वंध्या नारी प्रजायते सुवर्णस्य कृतं वृक्षं फलपुष्पसमन्वि
तम् ६ दद्याद् द्विजे विद्वेनारी पतिसेवासदापरा ततः पुत्रं प्रसूयेत सुवर्णपलतारशं ७ परपुंसिरता नारी स्वपतिं मिष्टवादिनी तेन पापेन भो देवि
कन्यापुत्रं न जायते ८ रौप्यस्यैव कृतं लिंगं पलपञ्चदशेन च पूजयित्वा प्रयत्नेन दद्याद् द्विजाय श्रोत्रियाय ९ ततः कन्या न जायेत पुत्रं शुभं प्रजाय
ते सततं वै यदा नारी कुलटा धर्मचारिणी १० तेन पूर्वविपाकेन नारी गर्भविनश्यति ततः संपूजयेद्देवं शंखचक्रगदाधरम् ११ प्रयागे मक
रे स्नानं पतिना सह कारयेत् स्वर्णशृंगीं रौप्यखुरां मुक्तालांगूलग्रथिताम् १२ दद्यात् सदक्षिणां देवि विप्राय विदुषे तथा या पतिं दुर्वलं स
न्तापरे णासह संगता १३ तेन पापेन भो देवि दरिद्रा पुत्रवर्जिता ततः कुमारीं संपूज्य ब्रह्मा विष्णु स्वरूपिणीम् १४ भोजयेद् द्विजमेकं तु प्रसह
नियतः प्रिये वर्षपूर्णे ततः तस्यां वस्त्रं दत्वा विसर्जयेत् १५ व्रतं सत्यस्य वै कुर्यात् प्रणामे प्रातिवासरम् तदा नारि पुरा पापं दहसेवन शासपः १६ स्व
र्भिष्ट भुज्यते

नारी[illegible]तिमिष्टं न दापयेत् तेन पापफलान्नारी मुखे दुर्गन्धता मियात् १७ गुडं वा दधि लाशं वा क्षिप्राय प्रयतस्सदा पपक्वतिद्विजेंद्र विमुखं शुद्धि
[illegible]याते १८ स्वपति प्रीवया नारी रंडा भवति नान्यथा तदानि संप्रपूज्या यतु लक्ष्मीभक्ति समुता १९ माघ कार्तिकवैशाखे मासे नः स्नानस
सा चरेत् एकादशीव्रतनित्यं द्वादशाम्सर विद्यया २० जपं कृत्वा प्रयत्नेन पतिरूपाय विष्णवे समर्पणं ततः कुर्यात् ततः पापं प्रणश्यति २१ यदा पा
पयुता नारी गर्भपातं च कारयेत् तेन दुष्कृतिने हज्वरकुक्षिप्रपीडनम् २२ योनिशूलं भवेद्देवि गुदरोगं भगंदरम् तदा कुर्यात्सपत्नेन ब्राह्मणीं ग्रा
द्वारां तथा २३ प्रसह्य पूजयेद्देवि पयस्विनीं च कारयेत् भोजयेद्द्विविधैश्चान्नैर्धृतस्वाद्रसमन्वितैः २४ गोदानं च ततः कुर्यात् द्विजविप्रोपजीविने
यदा नारी च दुष्टात्मा स्वपतिं दुर्वचो वदेत् २५ तदा कर्णरोगो भवेद्दो नाशा पापेन शोभवेत् तिलगुल्मं सदा सिंचेत् पावसुण्यं प्रजायते २६ गोष्पंगु
स्पुतं देवि सुवर्णेन समन्वितम् दद्याद्धि पापविद्धेषतदा समसपत्नं प्रिये २७ कन्यकां च कलारूपां हन्यान्नारी पदा हठात् तदा कुष्ठी भवेद्देवि जन्म
जन्मदरिद्रता २८ सूर्यस्य पूजनं कान्ते सदा नारी व्रतं चरेत् मासे मासे शनैर्वारे दृष्ट्वा विष्णुस्वरूपिणी २९ विधिवत् पूजनं कुर्यात् सर्वपापं विशुज्य
ति स्वश्वश्रूं च स्वसुरश्चैव नित्यं क्रूरवचोऽब्रवीत् तेन पापेन भो देवि विष्ठेत पुष्पतो भवेत् सूर्यस्य प्रतिमां देवि सुवर्णस्य पलत्रयम् ३१ दद्या
द्विप्राय विदुषे सूर्यस्यैव व्रतं चरेत् ततः पापक्षयं याति दृश्येन पुष्प विनश्यति ३२ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे स्त्रीणां प्राय
श्चित्तकथनं नाम अष्टमोऽध्यायः ८ ।। श्रीशिव उवाच भरण्याः प्रथमे पादे नीलकण्ठो भवद्द्विजः व्रतकर्मपरिभ्रष्टो काकुस्थनगरे शुभे १ ।।
वैश्येन सह मित्रत्वं कृत्वा दिने दिने ब्राह्मणी तस्य गृहे च पतिपुत्रविवर्जिता २ न स्याद्द्रव्यं गृहे तं च विक्रयार्थं द्विजेन तु ततो बहु दिने गतेन
स्याद्द्रव्यं न दत्तवान् ३ एवं बहुतिथे काले तस्य मृत्युरजायत ब्रह्मकर्मपरिभ्रष्टो नरके पतनं शुभे ४ नरकान्निर्गतो देवि सर्पयोनिरजायत सर्पयोनिं
परित्यज्य गर्दभत्वमवाप्नुयात् ५ पुनः सम्प्राप्तवान्देवि मध्यदेशे च मानुषम् धनधान्यसमायुक्तः पुत्रकन्याविवर्जितः ६ ततो बहुतिथे काले ततः
कन्या प्रज्ञापते स्वर्गं पूर्वं त्वतं देवि स्वर्गसंवधजासुता ७ ततः सा वद्दितां कन्या विवाहमभवन्नु लक्ष्मीः पितृमातृप्रियानित्यं संप्रवति सा पराभवम्
८ ततः सा विधवा जाता पितृभ्रातृः स्वदास सदा पुनः पुत्रभावत्सं प्रायश्चित्तमनः शृणु ९ सूर्यस्य [illegible] नाम्ने नरस्य मे कंवरानने पायेवं पूजनं

धि

कर्म सम्यक्कुर्यात्वकेतिततोजपं १० होमंवैकारयेद्धीमान्सनंब्राह्मणभोजनम् पापसंशमकरा पत्नंकारयेद्धिं पूर्वं कम् ११ ततःकूपतडागगोकारिकाचेमहापथे एवं
५ कृतेनसंदेहोसर्वकामोवरानने यद्दानक्रियतेदेविततःवंशोनजायते १२ इतिश्रीकर्मविपाकसंहितायांभरणीनक्षत्रे प्रथमपादप्रायश्चित्तकथनं
नामनवमोध्यायः ९॥ श्रीशिवउवाच अथद्वितीयंवक्ष्यामिभरण्याश्चरणंप्रिये तस्याःसर्ववदिष्यामिपत्नकृतंपूर्वजन्मनि १ अयोध्यानःत
तोदेविक्रोशमात्रेप्रदक्षिणे जानकीवेपुरंशुभ्रंद्विजंवसतिनस्करः २ ब्रह्मकर्मपरिभ्रष्टोमद्यपानरतःसदा तेपीवेश्यारतोनित्यंतस्यपत्नीप
तिव्रता ३ पतिभक्तिरतानित्यंश्वश्रूवेपूजनेसदा एकदाब्राह्मणोःप्येकःक्षुधार्तोदुर्बलःप्रिये ४ अन्नंवैयाचितंतेनलब्धंपठंप्रतिवत्सलेदुर्वचं
वावदद्देविभिक्षुकंदुर्बलंप्रति ५ आत्मघातःकृतस्तेनब्राह्मणेनवरानने ततोवहुतिथेकालेमरणंतस्यवैभवम् ६ पतिव्रतेनतस्यस्त्रियाश्च स्वस
लोकंसमागमत् वर्षाणांसहस्राणिस्वर्गेवसतिसद्विजः ७ ततःपुण्यक्षयेजातेमर्त्यलोकेसमानुषः पूर्वपापफलाद्देविपुत्रकन्याविवर्जितः ८ तदु
देश्येनमरणंब्राह्मणस्याभवत्पुरा मद्यपानंकृतंतेनततःकुष्टमजायते ९ तस्यशांतिंप्रवक्ष्यामियतःपापात्प्रमुच्यते गायत्रीमूलमंत्रेणलक्ष्य
जाप्यप्रयत्नतः १० दशांशहोमःकर्तव्योविप्राणांभोजनंशतम् विधिवत्पूजयेत् गांतुकपिलांस्वर्णभूषिताम् ११ दद्याद्विप्रायपतांदेविविदुषे
ज्ञानरूपिणे अतःपुत्रःप्रजायेतरोगनाशोभवेद्ध्रुवम् १२ इतिश्रीकर्मविपाकसंहितायांभरणीनक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामनवमोऽध्यायः
श्रीशिवउवाच एकोवणिक्जनोदेविकाकुस्थनगरे ततःअग्निकोणेशिवपुरेयोजनार्द्धप्रमाणके १ धनाढ्योवावसेद्देवि वेश्यहतिरतःसदावि
श्रीपंक्रियतेनित्यंगुडमद्यंरसादिकम् २ एकदासमयेदेविगुडंक्रयस्यप्रपूजतः हर्षभारगुडेनेवकृतंवहुवरानने ३ भारेणपीडितोनद्वानमृतःपथितदाशिवे
नशांतेस्यमरणंहर्षकालसमुद्भवम् ४ एवंबहुगतेकालेविरञ्चमंगलवेपुरे वैश्यस्यमरणंदेविसरथ्यासहभार्यया ५ स्वर्गलोकेगतोह्यर्थान्तोतस्तेनप्रभावतः रो
पाश्ववर्षसहस्राणिस्वर्गेभुक्त्वाशुभंफलम् ६ ततःपुण्यक्षयांतेवैमर्त्यलोकेवरानने अवंतीनगरेजातोधनधान्यसमन्वितः ७ मध्यदेशेविशाला
क्षिपूर्वकर्मफलंततः पुत्रोनजायतेदेविगर्भपातंतथाविधम् ८ कन्यकावैप्रजायंतेपुनःपुष्पंनजायते शरीरेवज्वरोत्पत्तिर्मध्येमध्येप्रजायते ९
प्रायश्चित्तंप्रवक्ष्यामिपूर्वपापविशुद्धये सुवर्णस्यहर्षश्चत्वेपलंपंचमितंतथा १० प्रतिमांकारयेद्देविहर्षमेकंविभूषितम् प्रपूज्यशिवमंत्रे

१२
णं वै द्विकेन यथाविधिं ११ प्रदद्याद्दिद्विषे तस्मै स्नानिनेयापशुद्धये ॐ नमः शिवाय मंत्रेण लक्ष्यजाप्यं प्रयत्नतः कारयेद्भक्तियुक्तेन होमं कुर्याद्दशांशतः
मार्जनं तर्पणं पश्चाच्छतविप्रांश्च भोजयेत् १३ एवं कृते न संदेहो वंशस्तस्य भवीष्यति रोगतो मुच्यते देवि नात्र कार्या विचारणा १४ इति श्रीकर्म
विपाकसं० भरणीनक्षत्रस्य तृतीयचरणप्रायश्चित्तकथनं नाम दशमोऽध्यायः ॥ श्रीशिव उवाच शृणु देवि प्रवक्ष्यामि नृणां कर्मविपाकजम्
प्रवक्ष्यामि न संदेहो मदिते श्रवणोमतिः १ उत्तरे चाप्ययोध्यायास्ततः कोशत्रयोपरी तत्र तिष्ठति वै विप्रो लोकशर्मा ततः प्रिये २ तस्य पत्नी शुभांगी चै
लीलानाम्नीति विश्रुता ब्राह्मणः कर्मविभ्रष्टो व्याधीरुपि लराननेः ३ सम्मृगान्सकुलान्हंती पक्षीणोपि विधानपि तस्य पत्नी सदा दुष्टा मुखरा च च
लातथा ४ परपुंसिरता नित्यं धर्मकर्मविवर्जितः एवं सर्ववयो जातं दृष्टुं सतिवराननेः ५ मरणं तस्य वै देवि स्वपुरे शरसूतटे पश्चान्मृता ततः पत्नी
दुष्टा वै व्यभिचारिणी ६ उभौ च नरकं जातौ स्वकर्मफलतः स्थितौ कुम्भीपाके महाघोरे विविधा नरकयातना ७ भुक्ता वर्षसहस्राणि पुनर्जी
तापि शूकरी योनिं स शूकरी भुक्ता विडालत्वं पुनः प्रिये ८ मूतां विडालयोनिं स भुक्ता गृहं स ततो ऽभवत् पुनः कर्मवशाद्देवि मानुषत्वं ततो ऽभवत् ९
इह लोके वरारोहे पूर्वकर्मप्रभावतः मृतवत्साभवेन्नारी पुत्रो जातो न जीवती १० बहुरोगी भवेद्देवी ज्वरेणैव प्रपीडितः पूर्वजन्मकृतं पापं इह जन्म
नि भुज्यते ११ अथ शांतिं प्रवक्ष्यामि शृणु त्वं गिरिजे मम वंशगोपालमंत्रेण लक्ष्यजाप्यं वराननेः १२ दशांशहोमः कर्तव्यो विप्राणां भोजनं
शतम् मंत्रमेतत्प्रवक्ष्यामि कृष्णमंत्रमनुष्टुभम् १३ येन जाप्येन भो देवि शीघ्रं पुत्रमवाप्नुयात् ॐ देवकीसुत गोविन्द वासुदेव जगत्पते १४
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ततो वै सम्मृगान्कृत्वा मृगबालान्सपक्षिणः १५ स्वर्णं पंच पलेनैव मृगान्कृत्वा सबालकान् रौप्यस्यैव वरा
रोहे पक्षिपंच पलात्मकान् १६ पूजनं विधिवत्कृत्वा संप्रार्थ्य विधिवद्गुरीं अष्टारं सर्वलोकानां सर्वकामप्रदं शान्तं मृ १७ देवदेव महादेव शर
णागत वत्सल त्राहि मां कृपया देव पूर्वकर्मविपाकतः १८ एवं संपूज्य देवेशं ततो विप्रं प्रपूजयेत् सुवर्णेन वरारोहे शय्यादीवाहनेन वै १९ ॥
प्रति मासमर्षया मासविप्राय तानरूपिणे वाटिकाकूपखातं च पथि मध्ये शुभानने २० प्रकरोति यदा देवि तदा पुत्रप्रजापते रोगात्प्रमुच्यते रो
गी जीववत्सो न संशयः २१ इति श्रीकर्मविपाकसंहितायां गौरीहरसंवादे भरणीनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनं नामैकादशोऽध्या

कर्म० ६

यः ११ ॥ श्रीशिवउवाच कृत्तिकायां वरारोहे पूर्वजन्मनिसंचितम् कृतं मन्मानुषे देवि शुभाशुभविवेष्टितम् १ ईशाने पत्तने देवि कौश
लापुरतो नदे २ जपद्मोवसुसेके न मरे गूढसञ्ज्ञके नामतो प्यहिवमे तिनस्य पत्नी कलावुभा धनधान्यसमा पुत्रो रूपवान्मन्मथोपथा
३ प्रातिर्वा खेटकं नित्यं गृहीत्वा सगाश्रणीम् प्रसहं मृगमांसेन पोषयेत्स्वतनुं तदा ४ शरीरे हृष्टता जाता दया तस्य न जायते ततो वै मरणे दे
विसतो भार्यात तोऽभवत् ५ सत्यलोकं गतस्तेन भार्यापाशकृतेन तु भुक्तं कल्पमितं पुण्यं सत्यलोके वरानने ६ पुनः पुण्यक्षये जाते मानु
सत्वं च भूत्वह पत्न्या सह वरारोहे कुले महति पूजिते पूर्वजन्मविपाकेन मृतवत्सत्वमाप्नुयात् ७ मृगीं सगर्भां हत्वा वै पूर्वजन्मनि सुव्रते ततः कर्मवि
पाकेन मर्त्यलोके ऽपुत्रकः ततः शांतिं प्रवक्ष्यामि पुत्रः पुत्रमवाप्यते ८ गायत्री यानदेवा ह्यालक्ष्यं पूजयेत्तथा दशांशहोमः तत्त्वात्विप्रा-
णां भोजनं शतम् १० सुवर्णस्य मृगीं कृत्वा मृगवालं तथैव च वपूजयित्वा विधानेन कपिलां गां ततंभि ये ११ मरघाहेदविदुषे ब्राह्मणाय सतेजसे ह
रिवंशश्रवणं चैव चांडी शिवप्रपूजनम् १२ एवं कृते विधानेन शीघ्रं पुत्रः प्रजायते १२ इति श्रीकर्मविपाकसंहितायां गौरीहरसंवादे कृत्तिकान
क्षत्रस्य प्रथमचरणप्रायश्चित्तकथनं नाम द्वादशोऽध्यायः १२ ॥ श्रीशिवउवाच नराणां पुण्यशीलानां इह जन्मसमुद्भवाः तेषां वक्ष्याम्यहं देवि पू
र्वजन्मफलोद्भवः १ येन दत्तं प्रदानं गोसुवर्णगजादिकम् तत्फलेन महादेवि इह जन्मसुखी भवेत् २ जन्मतः कान्तिलक्ष्मीवान् गुणवान् ज्ञानवा
नपि सोऽयं प्रभुज्यते नित्यं पुत्रतो धनतस्तथा ३ नरोगं प्राप्यते देवि दुःखं नैव कदाचन इहलोके सुखं भुक्त्वा कीर्तिमान्सुखमेधते ४ अथ व-
क्ष्याम्यहं देवि नक्षत्रे कृत्तिकसत्तके द्वितीये चरणे देवि पूर्वजन्मनि यत्फलम् ५ कान्यकुब्जे द्विजः कश्चिदिन्द्रशर्मेति विश्रुतः पत्नी रुक्मवती देवि
कुशीला कलहप्रिया ६ वेदपाठरतो नित्यं षडंगं प्रसहृ पठेत् एकदा वै तत्र देशे कश्चन् क्षत्री नराधिपः ७ मरणं तस्य वै जातं तद्धि प्रस्य निमंत्र
णम् भुक्तं तेन तदा देवि तस्य क्रियासु च ८ गृहीतं तस्य वै दानं शय्यां चैव गजादिकम् सर्वं तद्गृह्य गां कृत्वा भुक्तं बहुदिनं प्रिये ९ ततो बहुगते
काले तस्य विप्रस्य पंचता ततो सौ यमलोके वै नरके तत्सुदारुणे १० भुक्तं नरकजं दुःखं युगमेकं वरानने ततः अजाया प्रक्रमीनाचयोनिं भुक्तं पृथ
क्पृथक् ११ मानुषत्वं पुनः प्राप्तं पूर्वकर्मविपाकतः पुत्रो न जायते देवि कन्यका विविधास्तथा १२ मृतवत्सा भवन्नारी रोगाश्च विविधाः

प्रिये शान्तिंतस्यप्रवक्ष्यामीयस्मात्पुत्रःप्रजायते १३ गायत्रीलक्ष्यजाप्यंचत्र्यम्बकेनततःशिवे होमंचकारयेद्विद्वान्षडंशंदानमेवच १४ दशचलो
वर्णंस्याद्विधिवद्ब्राह्मणायच भोजयेत्सप्तषष्टीर्वाब्राह्मणांवेदपारगम् १५ एवंकृतेनसंदेहोजायतेद्वौसुतौप्रिये रोगाणांचनिवृत्तिःस्यात्पूर्वपा
पक्षयोभवेत् १६ ॥ इतिश्रीकर्मविपाकसंहितायांगौरीहरसंवादेकृत्तिकानक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामत्रयोदशोऽध्यायः १३ ॥
श्रीशिवउवाच तृतीयंतस्यवैदेविचरणंवदतःशृणु कान्यकुब्जकुलेकश्चिन्नगरेसूर्यवेपुरे १ रुद्रशर्माद्विजस्तत्रतस्यपत्नीगिरिजाभवत् वे
दपाठरतोनित्यंदरिद्रेणैवपीडितः २ कर्कशाभामिनीतस्यनिष्ठुरंप्रावदत्सदा एकदासूर्यग्रहणेतैलकारस्तदागतः ३ गंगामध्येददौदानंतस्मै
विप्रायवैशिव प्रददौतैलस्यसंस्थावैस्वर्णमुद्रांसदक्षिणाम् ४ प्रतिग्रहंततोदानंगृहीत्वाचद्विजस्तदा व्ययंकरोतिवैविप्रोभार्यापुत्रेणचैवहि
५ वेदपाठंततः कृत्वाप्रत्यहंसुखदःप्रिये मरणंवृद्धसमयेगृहेसर्वोपरिस्थिते ६ स्वर्णमध्येनदानेनवैनष्टंतं गिरिनन्दिनी संगतेनारवैर्घोरैर्यमराज्ये
नप्रेरितः ७ भुक्तंनरकजंदुःखसस्त्रीपुत्रेणसंयुतम् युगमेकंवरारोहेप्रेतत्वंकाकजंपुनः ८ ततःशृगालयोनिर्वैमानुषत्वंततोऽभवत् पूर्वज
जन्मकृतंपापंइहलोकेप्रभुज्यते ९ पाठयामाससर्ववेदान्ब्राह्मणेभ्योवरानने तत्संचितफलाद्देविमहदैश्वर्यमाप्नुयात् १० भार्यामृताततःपुनो
द्वितीयांसमुवाहच शरीरेबहवोरोगाःसुखंतस्यनजायते ११ वृद्धेसतिवरारोहेपुत्रश्चान्तुरजायते मृतवत्साभवन्नारीपूर्वजन्मविपाकतः १२ ॥
तस्यपुण्यमहंवक्ष्ये यतःशोकंनिवर्तते पुनःपुत्रोऽभवद्देविकन्यकानैवजायते १३ जातवेदादिमंत्रेणजपंवैकारयेद्बुधः लक्षमेकंप्रयत्नेनत
तोहोमंतिलादिभिः १४ चतुरस्रेशुभेकुण्डेहरिवंशश्रवणंततः भूदानंविधिवत्कुर्यात्शय्यापात्रंप्रदापयेत् एवंकृतेनसंदेहोरोगनाशो
भविष्यति १५ इतिश्रीकर्मविपाकसंहितायांगौरीहरसंवादेकृत्तिकानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामचतुर्दशोऽध्यायः १४ ॥
श्रीशिवउवाच कान्यकुब्जेद्विजःकश्चिन्नर्मदादक्षिणतटे माहिष्मत्यांवसत्येकोद्विजःपरम वैष्णवः १ नामतोऽपीन्द्रशर्मेतितस्यभार्याविवा
दिनी प्रत्यहंवैश्यवृत्तिस्सप्राकरोद्द्विक्रयंसद्म २ तत्रवैश्योवसत्येकोधनधान्यसमन्वितः वैश्यत्तस्तेनविप्रेणस्वर्णंनीतंप्रशंबहु ३ ततोबहु
गतेकालेसविप्रोमृतवत्सकः ऋणं तस्यनदत्तंहिवैश्यापस्तुध्वकस्तदा ४ मरणेसतिविप्रोऽसौनरकंरौरवंगतः वैश्यकर्मकृतंतेनस्वध

कर्म मेपरिवर्जितः ५ विंशतिवर्षसहस्राणिनरकेचावसद्द्विजः नरकान्निःसृतोदेविजातोवृषभशूकरौ६ योनि द्वयंफलंभुक्त्वानरत्वंसप्रजापते॥
७ धनधान्यसमायुक्तो सुतपुरस्तात्प्रभावतः ७ऋणसंबंधतोदेविवैश्यपुत्रस्ततोऽभवत् प्रत्यहंतस्यवैद्रव्यंय कुर्यादिनेदिने ८प्रवैश्यप्रदानेनधनं
सर्वव्ययंकृतम् यदापुत्रसमायुक्तोयुवारूपोभव त्प्रिये ९ तदामृत्युंसगतवान्शोकंहत्वातपोस्तथा पुनःपुत्रोनजातोवैपूर्वजन्मविपाकतः १०
प्रायश्चित्तंप्रवक्ष्यामिपूर्वपापविशुद्धये गायत्रीलक्षजाप्येनतदर्थंवाटिकापथि ११ कूपंप्रयत्नतःकुर्यात्तडागंविधिवत्प्रिये होमंवैकारयामा
त सविधिपूर्वंवरानने १२ पलंपंचतोदानंसुवर्णंचविशेषतः दशवर्णाःप्रत नव्याःस्वर्णपुत्राःसहाम्बरा१३ भोजयेच्छतविप्रांश्चयथाशक्ति
सदक्षिणम् एवंकृतेनसंदेहोरोगनाशोभवेद्ध्रुवम् १४ पुत्राःपौत्राश्चवर्द्धन्तेममवाक्यंनचान्यथा १५ इतिश्रीकर्मविपाकसंहितायांगौरीहरसंवा
देकृत्तिकानक्षत्रस्यचतुर्थचरणेप्रायश्चित्तकथनंनामपंच शोऽध्यायः १५ ॥श्रीशिवउवाच अथातःसंप्रवक्ष्यामिब्रह्मनक्षत्रजंफलम् रो
हिण्याःप्रथमेपादेपद्राजन्मप्रजापते १ तस्यकर्मपुरादेविसंचितंच ब्रवीम्यहम् आनर्तदेशेद्विजोदेविप्रतिग्राहीवसत्यसौ २ पुण्यकर्मविहीन
श्चचोरकर्मरतश्चसः सार्द्धंचौरैर्गणैर्देविबहुद्रव्यमुपार्जितम् परस्त्रीलंपटोदेविस्वभार्यांपरित्यक्तवान् ३ एवंबहुगतेकालेकालवश्यस्त
तोऽभवत् यमाज्ञयाचदूतेननरकेकर्दमोभवेत् ४ वासपामासओदेविषष्टिवर्षप्रमाणकम् नरकान्निःसृतोदेविकुक्कुटस्त्वंप्रजापते ५
ततोजातोमहादेवियोनिर्मानुषदुर्लभाम् शांतिदानंप्रवक्ष्यामितत्सर्वंशृणुमेशिवे ६ ॐनमःशिवायमंत्रेणलक्षजाप्यंचकारयेत् पार्थि
वंतिलपिष्टेनगोमयेनतथाप्रिये ७ पूजयामासविधिवद्भक्तियुक्तेनचेतसा होमंवैकारयेद्देविषडंशंदक्षिणांततः ८ आचार्यायस्वर्णंचपू
र्वपापविशुद्धये कूपंखातंततोदेविवाटिकांवैप्रकारयेत् ९ एवंकृतेनसंदेहोरोगनाशोभवेद्ध्रुवम् कन्यकानभवेद्देविपुत्रश्चैवप्रजापते १० प्र
तवत्सालभेत्सूत्रंचिरंजीवीनसंशयः ११ इतिश्रीकर्मविपाकसंहितायांगौरीहरसंवादेरोहिणीनक्षत्रस्यप्रथमचरणेप्रायश्चित्तकथनंना
मषोडशोऽध्यायः १६ श्रीशिवउवाच द्वितीयचरणेदेविरोहिण्याश्चप्रजापते पूर्वकर्मविपाकेनविस्तरंजायतेतनुम् १ गंगायाःउत्तरे राम
कूलेपुरंवैमानिकंशुभम् वासुदेवोहिनाम्नावैब्राह्मणोवेदपारगः २ लीलावतितिविख्यातातस्यपत्नीशुभानना याग्रुवतिरूपसम्पन्ना ७

८
संसारिणी सा सदा प्रिये ३ बहुद्रव्यं तु पालन्ध्यं परपुंसप्रसंगतः पतिश्चोपार्जितं द्रव्यं भुज्यते पतिना सह ४ गंगायां मरणं तस्य विप्रस्य भार्यया सहस्व
र्गवासः कृतस्ताभ्यां षष्टिवर्षं वरानने ५ ततः पुण्यक्षये प्राप्ते मर्त्यलोके वरानने धनधान्यसमायुक्तो धर्मसत्तातथाधिका ६ पुत्राश्च बहवो जातो
मृतास्ते च मुहुर्मुहुः कन्यका बहुधा जातास्तासां मृत्युर्जायते ७ पुनर्वंशसमाभावे वृद्धरोगः प्रजायते तस्य शान्तिमहं वक्ष्ये पत्न्या तत्पूर्वजन्मनि
८ त्र्यम्बकेति च मन्त्रेण लक्ष्यजाप्यं वरानने देवस्य प्रतिमां कृत्वा पूजयेत्सा ततः प्रिये ९ सौवर्णस्य शिवं कुर्यात्स्वल्पपंचप्रमाणकम् धूपैर्दी
पैश्च नैवेद्यैर्मन्त्रेणानेन वै पृथक् १० ॐ ह्रौं ह्रीं जूं सः हराय नमः इति प्रतिमास्थापनं रौप्यपात्रे ॐ ह्रौं ह्रीं जूं सः महेश्वराय नमः इति प्रतिमाया अ
ग्रे द्वादशकमलं विलिख्य प्रपूजयेत् ॐ ह्रौं ह्रीं जूं सः शूलपाणये नमः इति पूजोपकरणानि संगृह्य स्थापयेत् ॐ ह्रौं ह्रीं जूं सः पिनाकिपतये
नमः इति प्रतिमां स्पृष्ट्वा स्थापनं कुर्यात् आवाहयाम्यहं देवदेवेशं सनातनम् इमां पूजां गृहाण त्वं मम पापं व्यपोहतु ११ ॐ ह्रौं ह्रीं जूं सः यं रं लं वं शं
षं सं हं सः सोऽहं शंकरस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणा इहागत्य इह तिष्ठ जीव इह स्थितः सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रति
ष्ठां विधाय शिवं ध्यात्वा प्रपूजयेत् ॐ ह्रौं ह्रीं जूं सः पशुपतये नमः इति पंचामृतेन स्नापयेत् ॐ ह्रौं ह्रीं जूं सः शिवाय नमः इति चन्दनादिभिः
प्रपूजयेत् ॐ ह्रौं ह्रीं जूं सः महादेवाय नमः इति विसर्जनम् गोदानं च ततः कुर्यात् कृष्णां वा कपिलां तथा विप्राय विदुषे देवि स्वर्णरौप्यं च दक्षिणा
म् १२ प्रदक्षिणां ततः कुर्यात् विप्रः शिवस्वरूपिणाम् शतसंख्यान् द्विजांश्चैव भोजयित्वा विसर्जनम् १३ प्रयागे मकरे चैव दंपतिभ्यां वरानने ॥
स्नानं वै कारयेद्देवि व्रतमेकादशीं तथा १४ एवं कृते न संदेहो रोगनाशं च जायते पुत्रं च जनयेद्देवि चिरंजीविनमुत्तमम् १५ यथा ह्येवं न कुरुते स
दा जन्मस्वपुत्रकः १६ इति श्रीकर्मविपाकसंहितायां गौरीहरसंवादे रोहिणीनक्षत्रद्वितीयचरणप्रायश्चित्तकथनं नाम सप्तदशोऽध्यायः ॥
श्रीशिव उवाच गोमत्या उत्तरे कूले पंचक्रोशप्रमाणके विष्णुदास इति नाम्ना वै देवीपुत्रो वरानने १ शंकरस्य पुरे शुभ्रे तस्य भार्या च सुन्दरी कर्क।
शा कुलटा सा वै पतिविद्वेषकारिणी २ श्वश्रुशुश्रूषां कुरुते नैव तस्याश्चैव वरानने स्वकर्मनिरतो धीमान् शिवभक्तिपरायणः ३ कृषिं च कुरुते नि
संविभागं चैव सेवकः पितॄणां परमो दासः सदा च प्रियभाषितः ४ एकस्मिन्दिवसे देवि व्रती कश्चित्समागतः भिक्षार्थमागतो दूरेन ।

क.वि. तपाभिस्नानदीयेते ५ अयमंशंवदंत्यातु भिक्षुकं प्रतिसुंदरी विष्णुदासो गृहा तस्मात् दिने तुक्रन्न विकृतः ६ एवं बहुगते काले तस्याम्
८ सुरजापत भुक्त्वा च विपुलान्भोगान् यक्षलोकं तदागतः ७ त्रिंशद्वर्षसहस्राणि यक्षेण सह भुक्तवान् तस्य भार्या मृता क्रूरा स्वश्वाश्वदुःखदा
यिनी ८ सा गता नरके घोरे रौरवे नाम्नि भामिनी भुक्त्वा नरकजं दुःखं पुनर्व्याघ्री स्वभूता पुरा ९ पुनः स्व गालीविजाता मानुषी च ततो ऽभवत् पुनर्विवा
हिता सा वै मर्त्यलोके वरानने १० वंध्या चैव विशाला क्षी पूर्वजन्मविपाकतः रोगं बहुविधं देहे सुखं नैवाप जापते ११ तस्याः पुण्यवदि
ष्यामि पूर्वपापप्रणाशनम् प्रसहं स्वपतिं माघे स्नापयेद् दुग्धवारिणा १२ स्वश्वाश्वचरणौ प्रातर्नमस्कृत्य प्रपत्नतः अलावुं नैव खादेत द्वादशाब्दं
प्रमाणकम् १३ माघे नियमतो देवि पतिना सह सुव्रते स्नानं नियमतो देवि विरोपं दद्याद् यथाविधि १४ ततः कृत्वा सुवर्णस्य कल्पवृक्षं सुरूपिणम्
पूजयित्वा ततो देवं शंखचक्रगदाधरम् १५ सगणं देवदेवेशं हृषीकेशं तु वरप्रदम् ततो वै पूजयेद्विप्रं विधिवद्गुरुरूपिणम् १६ कटकं कर्णके
यूरे कुंडलाभ्यां विभूषितः तद्वृक्षं वेदिकायुक्तं तस्मै विप्राय दापयेत् १७ अन्यान् विप्रान् वरारोहे भोजयेद्विविधैः रसैः पायसैर्मोदकैः शुभ्रैः
षट्षष्टिप्रमाणकान् १८ ततो गां कपिलां दद्यात् स्वर्णशृंगीं सनूपुराम् सप्तमीरविसंयुक्तां व्रतं कुर्यात् सदा प्रिये १९ गोपालस्यैव मंत्रेण लक्ष्य
जाप्यं वरानने होमं कृत्वा दशांशेन मार्जनं तर्पणं तथा २० एवं कृते न संदेहो शीघ्र पुत्रः प्रजायते कन्यका नैव जायंते रोगं सर्वं निवर्तते २१ इति
श्रीकर्मविपाकसंहितायां गौरीहरसंवादे रोहिणीनक्षत्रे तृतीयचरणप्रायश्चित्तकथनं नामाष्टादशोऽध्यायः १८ श्रीशिव उवाच रोहि
ण्याश्चरणे देवि चतुर्थे संप्रतं शृणु यत्कृतं संचितं पूर्वं इह जन्मनि तत्फलम् १ वृद्धिस मो द्विजः कश्चिदन्तर्वेदे ऽभवद् द्विजः पुरोहितः परीभ्र
ष्टो ग्रामे निसं भुनक्ति सः २ गृहे गृहे महादेवि परान्नं नित्यमेव हि श्राद्धकर्मपरिभ्रष्टः परपाके सदा रतः ३ परस्त्रीनिरतो नित्यं चंचलश्चपलः
सदा बहुधनं संचितो ते न प्रातिग्राहेन वै प्रिये ४ मरणांतस्य वै जातं पश्चाद्भार्या मृता च सा गतो ऽसौ नरके घोरे पूर्वजन्मफलं यतः ५ युगमेकं
वरारोहे मध्यदेशे वरानने अपुत्रता भवत्तस्य कन्यका नैव जायते ६ शरीरे रोगसोत्पत्तिः सुखं नैव प्रजायते प्रायश्चित्तं ततो देवि प्रवक्ष्यामि
वरानने ७ आकृष्णेति जपेन्मंत्रं लक्षं वै विधिवत्प्रिये होमं वै कारयेद्देवि तिलैश्च मधुना सह ८ कुंडे वै वर्तुलाकारे दशांशं तर्पणं तथा

मार्जनं च विशेषेण ततो ब्राह्मणभोजनम् ९ दशवर्णाप्रदातव्या गुडधेनुं ततः प्रिये शय्यां दद्यात्सयत्नेन विधिवद्ब्राह्मणाय च १० भोजयेद्ब्राह्म
णान् शुद्धान् वेदपाठरतान् शिवे सप्तसप्ततिसंख्याकान् दीक्षितान् शुद्धमानसान् ११ प्रयागे माघमासे तु प्रातःस्नानं सभार्यया एवं कृते भवेद्देवि पुत्र
श्रुम्नः प्रतापवान् १२ इति श्रीकर्मविपाकसंहितायां गौरीहरसंवादे रोहिणीनक्षत्रे चतुर्थचरणप्रायश्चित्तकथनं नामैकोनविंशतितमोऽध्यायः
श्रीशिव उवाच अथ वक्ष्ये महादेवि चन्द्रनक्षत्रजं फलं यत्कृतं मानुषैः पूर्वं शृणु त्वं नगनन्दिनि १ मध्यदेशे परं शुभ्रं वसत्येको द्विजः खलु। ब्रह्मक
र्मरतो नित्यं वेदवेदाङ्गपारगः २ प्रत्यहं पाठयामास चतुर्वेदाङ्गविस्तरान् वेदशर्मा द्विजः ख्यातस्तस्य स्त्री शीलिकाभवत् ३ प्रत्यहं पठते वेदान् जीविका
र्थं वरानने लोहकारोऽभवन्मित्रं तस्याप्येको हि सुव्रते ४ स्वर्णाशनपले देवि स्थापितं लोहकर्मणा तस्य विप्रस्य भवने मित्रत्वाच्च वरानने ५ लोह
कारस्य मरणं ब्राह्मणस्य च विक्रियात् सूर्यलोकं गतो देवि यतः सूर्यस्य सेवकः ६ विंशतिवर्षसहस्राणि सूर्यलोके वसत्पुरा ततः पुण्यक्षये
जाते मर्त्यलोकेऽभवत्सुतः ७ पुत्रकन्याविरहितो धनधान्यसमन्वितः लोहकारस्य यत्स्वर्णं गृहीतं नैव दत्तवान् ८ तेन कर्मविपाकेन लोहकार
स्ततोऽभवत् प्रीतिमांश्चैव सर्वेषां पितृमातृप्रियंकरः ९ युवापदासमापन्नस्तदा मृत्युरजायते पुनः पुत्रस्य चाभावः कन्यका नैव जायते १०
तत्पापस्य विशुद्ध्यर्थं प्रायश्चित्तमतः शृणु गायत्रीलक्षजाप्येन दुर्गायाः पूजनेन च ११ दशवर्णाप्रदानेन भूमिदानेन पार्वति सर्वपापक्षयं याति पूर्वे
जन्मसमुद्भवम् १२ गयाश्राद्धं प्रयत्नेन तदर्थं नियतः प्रिये प्रयागे मकरे मासि स्नानं कुर्यात्सयत्नतः १३ ततः पापक्षयं याति पुनः पुत्रश्च जीवति॥
रोगं सर्वं क्षयं याति नात्र कार्या विचारणा १४ इति श्रीकर्मविपाकसंहितायां गौरीहरसंवादे मृगशिरानक्षत्रे प्रथमचरणप्रायश्चित्तकथनं नाम वि
शतितमोऽध्यायः २० श्रीशिव उवाच कान्यकुब्जे शुभे देशे निकटे नन्दने पुरे बोधशर्मा पुरे तत्र विप्रो वसति निर्द्धनः १ परान्नं भुज्यते नित्यं परद्रव्यर
तः सदा तस्य पत्नी समाख्याता बोधमृगा नामवेपुरा २ जन्मतो मरणं यावत्परान्नं भुञ्जतेऽनघे नरके पातनं चासीत्तयोर्नित्यं प्रतिग्रहात् ३ बहुवर्षसह
स्राणि वासनेन नरकेऽभवत् नरकान्निसृतो देवि काको जातश्च माहिषः ४ पुनर्मानुषयोनिं च पूर्वकर्मप्रभावतः रोगवान्धर्मशीलश्च पुत्रकन्यावि
वर्जितः ५ परान्नमस्यह भुक्तं श्राद्धं नैव कृतं पुरा अतश्च वंशविच्छेदः फलं भो देवि पूर्वजम् ६ शान्तिं तस्य प्रवक्ष्यामि पूर्वपापक्षयं ततः गायत्री

जातवेदाभ्यां द्विलक्ष्यजपतः प्रिये ७ ततः पापविशुद्ध्यर्थं दशांशं हवनं मदा मार्जनं देवि कर्त्तव्यं तिलवर्णविभूषितम् ८ एवं कृते न संदेहो रोगनाशो
भवेद्ध्रुवम् सन्तानं जायते देवि वंध्यात्वं च प्रणश्यति ९ इति श्रीकर्मविपाकसंहितायां गौरीहरसंवादे मृगशिरानक्षत्रे द्वितीयचरणप्रायश्चित्तकथ
नं नामैकविंशतितमोऽध्यायः २१ श्रीशिव उवाच नर्मदादक्षिणे कूले पुरी कांचीपुरी तथा तस्यां पुर्यां विशालाक्षी कुलालो धनवानपि १ कुला
ल कर्मतो देवि बहुद्रव्यमुपार्जितम् कर्मचन्द्रेति विख्यातस्तस्य पत्नी च देवकि २ स्वकर्मनिरतो ह्येव पात्रा कृत्वा दिने दिने एवं सर्वव्ययं जातं द्र
व्यं च ततो भवत् ३ हृष्टे जाते ततो देवि दारिद्र्युपजायत स्वर्णकारस्य वै द्रव्यं व्यवहारार्थं गृहीतवान् ४ शतसंख्यामितं स्वर्णं व्यपसंर्व हृतं शिवे ॥
कुलालस्याभवंस्त्रयः पत्नीतस्य मृता पुरा ५ नर्मदायां महादेवि द्वावुभौ मृत्युमापतुः नर्मदातीर्थमाहात्म्यात् स्वर्गलोकं गतावुभौ ६ बहुवर्षसहस्रा
णि ताभ्यां भुक्तं फलं शुभम् ततः पुण्यक्षये जाते मर्त्यलोके प्रजायत ७ मानुषं च शुभं जन्म धनधान्यसमन्वितः पुनर्विवाहिता नारी पूर्वजन्मप्रभ
संगतः ८ कारणं तेन वै देवि पुत्रो जातं सदा शिवे स्वर्णकारो महादेवि वैरुद्धं स वात नः खलु ९ प्रसह्य च सुपहृतं ध्वस्तं सर्वं वस्य पंहृतम् मरणांत
स्य वै जातं पुनः पुत्रो न जायते १० अथ शांतिं प्रवक्ष्यामि शृणु सर्ववरानने गायत्रीलक्ष्यजाप्येन त्र्यम्बकेन तथा प्रिये ११ कर्तव्यं कुण्डमुग्रं वै त्रिको
णं विधिवत्प्रिये होमं च कारयेद्देवि दशांशं तर्पणं तथा १२ ततो वै कपिलां दद्यात् द्रुमयुक्तां सहाम्बराम् एवं कृतेन संदेहो ह्यशुभः पुनः प्रजायते १३ स्व
र्णकारस्य प्रतिमां पलसप्तदशस्य तु स्वर्णस्यैव महादेवि रचितां वस्त्रछादनाम् १४ रूप्यरौप्यस्य वै कुर्यात् षष्टिपलमितं शुभे प्रदद्याद्विदु
षे ब्राह्मणाय सुतेजसे तस्यो देशतमो देवि त्र्यणं वंधात्प्रमुच्यते १५ इति श्रीकर्मविपाकसंहितायां गौरीहरसंवादे मृगशिरानक्षत्रे तृतीयचरणप्राय
श्चित्तकथनं नाम द्वाविंशतितमोऽध्यायः २२ श्रीशिव उवाच अथ वक्ष्याम्यहं देवि चतुर्थं चरणं तथा मृगशिरानामनक्षत्रं तस्य पूर्वं च कर्मजम्
१ अवन्तीपुरतो देवि दक्षिणे पंचक्रोशके पुरं तंचैव विख्यातं केशवं नाम यो मतेन २ अवसत्तत्र देवेशी ब्राह्मणो वेदपारगः किशोरशर्मा विख्यातो मो
गासक्तेन प्रमुच्यते ३ कष्टेनैव महादेवि व्ययं कुर्याद्दिने दिने धनं च बहुधा कृत्वा पुण्यकार्यं न चाकरोत् ४ ततो भ्रातृकनिष्ठस्य भागं नैव ददौ स सः वर्षः को
टिमितं द्रव्यं स्वगृहे चैव संचितम् ५ द्रव्यस्यैव विभागार्थं मरणं ब्राह्मणोपरि कृतं भ्रमं कनिष्ठेन द्रव्यं तस्मै न दत्तवान् ६ एवं बहुगते काले किशोरः

पिमृतः स्वपपृ गतः सनरके घोरे युगमेकोनविंशतिम् ७ पुनः कर्मवशाद्देवि गर्दभत्वमुपागत ह्रषयोनिं ततो जातो यातुधत्वं ततः परम् ८ मध्यदेशे
वरारोहे पुत्रो नैव प्रजापते कन्यका बहुधा गर्भो विनश्यंति वरानने ९ पूर्वजन्मकृतं पापं भुज्यन्ते देवि मानवैः इहलोके वरारोहे पुण्यं पापं च पूर्वजम् ।
१० भ्रातुस्तस्य कनिष्ठस्य मरणं पूर्वजन्मनि तदुद्देशेन देवेशि तस्माद्रोगश्च जायते ११ तस्य पापस्य शुद्ध्यर्थं शृणु देवि प्रयत्नतः गायत्रीमंत्रजाप्यं च लक्ष
मेकं वरानने १२ गृहे वित्तं षडंशेन पुण्यकार्यं च कारयेत् गायत्रीजातवेदाभ्यां त्र्यम्बकेन तथैव च १३ लक्षत्रयं जपं कुर्याद् दशांशः प्रदापयेत् ह
वनं विधिवत्कुर्यात्तर्पणं मार्जनं ततः १४ सौवर्णस्य वरारोहे रूपं कृत्वा प्रयत्नतः पंचपलप्रमाणेन हि गुणं तच्च सुन्दरि १५ रौप्यस्यैव प्रकर्तव्यं प
थाशास्त्रं प्रपूजयेत् मंत्रेणानेन भो देवि दद्याद्द्विजाय तद्रूपम् १६ ॐ ह्रीं मार्तंडाय भैरवाय स्वाहा ॐ श्री सूर्य महाभाग त्रैलोक्यतिमिरापह मम पूर्व
कृतं पापं क्षम्यतां परमेश्वर १७ ॐ सोमाय स्वाहा ॐ सोमरूप महादेव मंत्रराज द्विजोत्तम मम पूर्वकृतं पापमोषधीश क्षमस्व मे १८ ततश्च ब्राह्मणा
न्पूज्य भोजयित्वा विसर्जयेत् एवं कृते न संदेहो विद्वान्पुत्रः प्रजायते रोगः सर्वः क्षयं याति नात्र कार्या विचारणा १९ इति श्रीकर्मविपाकसंहितायां
गौरिहरसंवादे मृगशिरानक्षत्रे चतुर्थचरणप्रायश्चित्तकथनं नाम त्रयोविंशतितमोऽध्यायः २३ श्रीशिव उवाच अथातः संप्रवक्ष्यामि रुद्रनक्ष
त्रजं फलम् यत्कर्मविपाकं हि भुज्यते भुवि मानवैः १ अवन्तीपूर्यां भो देवि रङ्गकारोऽत्यतिष्ठतः अरजपट्टं बहुविधं वस्त्रं चैव स्वधर्मतः २ कुवेर इ
ति तन्नाम लीलासेव्या च तस्यासीत्पतिव्रता प्रिया देवि रंगकारोऽत्यजत्सुताम् ३ ब्राह्मणीं नगरस्यैकां रङ्गकारः समुद्वहत् त्यक्त्वा पतिव्रतां भार्यां ब्राह्मण्या
अभवत्पतिः ४ द्रव्यं च संचितं तेन रंगकारेण वै शिवे भूमिमध्ये च तद्द्रव्यं स्थापितं तेन सुंदरी ५ कश्चिद्दानं कृतं तेन गंगायमुनसंगमे मरणं तस्य वै जातं त
स्य भार्या विवाहिता ६ तत्पुरे च सती जातं लीलानाम्नी पतिव्रता सत्यलोकं गतः सोऽपि वर्षलक्षद्वयं प्रिये ७ पुनः पुण्यक्षये जाते नरलोके भवे तथा
वैश्यमध्यदेशे च विख्यातो धनधान्यसमन्वितः ८ पुत्राश्च बहवो जाताः सोऽपि तेषां न जीवति शरीरे रुजउत्पत्तिः षंढत्वं च रोगस्तथा ९ ब्राह्मणीग
मने देवि पूर्वजन्मनि वै कृतम् तेन पापेन भो देवि वंशमस्य न तिष्ठति १० अस्य शान्तिं प्रवक्ष्यामि तच्छृणुष्व वरानने दशायुतं जपेद्देवि गायत्रीं वे
दमातरम् ११ हवनं तद्दशांशेन तर्पणं मार्जनं तथा षडंशं चैव दानं च दद्याद्द्विजे शिवे १२ ब्राह्मणं भोजयेत्पश्चाद्वनीतेश्च पापसेः गां चैव

विधिवद्दद्यात्सुवर्णाशुभ्रभूषिताम् एवंकृतेनसंदेहोवहुपुत्राभवन्तिचरोगात्तस्माद्विनिर्मुक्तिर्नात्रकार्याविचारणा १४ इतिश्रीकर्मविपाकसंहिता
यांगौरीहरसंवादेरोहिणीनक्षत्रेप्रथमचरणप्रायश्चित्तकथनंनामचतुर्विंशतितमोऽध्यायः २४ श्रीशिवउवाच शृणुदेविवरारोहेनराणांवैपूर्वजन्मनि
पत्नीतेनचरास्सर्वेनरकेनिवसंतिहि १ उज्जयिन्याः पश्चिमेद्वारेवैश्यावैन्यवसत्सुधीः धनधान्यसमायुक्तः स्वकर्मनिरतःसदा २ एवंमध्य वयो
जातंदरिद्रस्ततोऽभवत् व्यापारार्थंततोदेविविप्रद्रव्यंततोऽग्रहीत् ३ पलविंशत्समाणंवैव्ययंजातंवरानने ततोवैश्यस्यमृत्युर्हिभार्यायासहि
तस्यच ४ स्वर्गेजातंततोदेविनर्मदामरणादनु षष्टिवर्षसहस्राणिस्वर्गे स्थेवफलंशुभं ५ भुक्तंवहुविधंदेविभार्ययासहितेनवैततःपुण्यक्ष
येजातेपुनर्मर्त्यौवभूवतुः ६ धनधान्यसमायुक्तौपुत्रकन्याविवर्जितौ रुग्णौदुर्वलगात्रौचपूर्वकर्मफलोद्धतौ ७ ऋणसंवंधतोदेविविप्रःपु
त्रोऽभवत्ततः ऋणंयावत्समाणंवैगृहीतंपूर्वजन्मनि ८ तावन्मात्रेगृहीतेतुततोवैमरणंभवेत् पुनःपुत्रेनतस्यैवविंशैवर्षेगतेसति ९ तस्यदा
नंशृणुष्वादौपूर्वपापक्षयंचयत् गृहवित्ताष्टमंभागंब्राह्मणायसमर्पयेत् १० स्वर्णपंचपलेनैवपुष्पं चक्रमलाकृतम् प्रदद्याद्वेदविदुषेब्रा
ह्मणायवरायच ११ गायत्रीचजपंकुर्याल्लक्ष्यमेकंवरानने होमंचतद्दशांशेन मार्जनंचयथाविधिः १२ गामेकांस्वर्णशृंगींचपट्टवस्त्रादिवि
भूषितांप्रदद्याद्देवदेवेशिपूर्वपापक्षयोभवेत् १३ पुनःपुत्रंप्रसूयंतेनात्रकार्याविचारणात् १४ इतिश्रीकर्मविपाकसंहितायांगौरीहर
संवादेआर्द्रानक्षत्रेद्वितीयचरणप्रायश्चित्तकथनंनामपंचविंशतितमोऽध्यायः २५ श्रीशिवउवाच अवंतीनगरीनामातत्रःक्रो
शद्वयोःपरीअग्निकोणेमहादेवीमंगलंनामवैपुरे १ तस्मिन्नग्रमेवससेकोब्राह्मणोदानतत्परः मद्यपानरतोनित्यंचौरविद्यारतोसदा
२ परस्त्रीलंपटोदेविवेश्यासौरततन्परः चौरेणद्रव्यमुत्पाद्य चतुर्थंदानमाचरेत् ३ एवंसर्वेव्ययंजातेतस्यमृत्युर्वभूवहः नरकेवेपातपाया
सुपमदूतैर्यमाज्ञया ४ सप्ततिवर्षसहस्रंचरौरवेपरीपच्यते महाकष्टंलभेद्देविसूचीमुखवकृमादिभिः ५ पुनःकर्मवशाद्देवीनरकान्निर्गतोयदा
विडालकाकयोनिचतदाप्राप्नोतिचक्षयम् ६ योनिद्वयंफलंभुक्त्वामानुषत्वं ततोभवेत् मध्येदेशेवरारोहेतनौपाउवहन्यपि ७ वशाद्धेहोभवे
देवीपूर्वजन्मविपाकतः तस्योपरिविशालाक्षीशांतिंशृणुवरानने ८ गायत्रीमातवेदाभ्यांत्र्यम्बकेचयथाविधिःजपेवैकारयामासहवनंत

पंशांतं तथा ९ अयुतस्यं जपंदेवि पूर्वपापविशुद्धये ततो वै पूजयेद्देवि तुलसीं विष्णुरूपिणीं १० पूजयेद्विधिवद्भक्त्या धूपदीपादिभिस्तथा ततो गोमि
थुनं दद्यात् घटदानं घृतस्य च ११ ब्राह्मणान्भोजयामास शर्करापायसेन च संकल्पमाचरेन्नापि मोदकेन तथा तथा १२ भूमिदानं ततो देवि दद्याच्छांति
प्रदापयेत् एवं कृते वरारोहे सर्वरोगक्षयो भवेत् पुत्रं च जायते देवी वंध्यात्वं च प्रणश्यति १३ इति श्रीकर्मविपाकसंहितायां गौरीहरसंवादे आर्द्रा
नक्षत्रे तृतीयचरणे प्रायश्चित्तकथनं नाम षड्विंशतितमोऽध्यायः २६ श्रीशिव उवाच अथातः संप्रवक्ष्यामि शृणु देवि यथा पुरा कृतं तेन रेणयस्त
तेन पूर्वजन्मनि किल्बिषम् १ अवंतीनगरे कश्चित् शूद्रो ह्यासीत् भाग्यवान् कृषिकर्मरतस्त्वेव क्रयविक्रयतत्परः २ व्यापारे सर्ववस्तूनि छागमेषसूनि
च च सततं भक्षते देवी छागमांसं विशेषतः ३ विक्रयं क्रियते छागं मेषं चमरूकं तथा गजमश्वं तथा रत्नं वस्त्राणि विविधानि च एकदा स्वयं गृहे द
शांसेन वरानने गोसहस्रं कृतं दानं भार्यया सहितेन वै ५ नर्मदायां निशायां च क्षीरवस्त्रं घृतं तथा सुखं च बहुधा कृत्वा मर्त्यलोके समुद्भवम्
६ ततो बहुगते काले शूद्रस्य मरणं भवेत् गतो सौ नरके घोरे वर्षलक्षस्य रूपतः ७ विपाकं बहुधा पीडा भुक्ता चैव स्वकर्मतः पुनर्यातो मृत्युलोके काके
हरिवंशश्रवणं देवि विधिपूर्वं च दंपती १५ एवं कृते वरारोहे पूर्वजन्मद्विजोऽभवत् पापं प्रणाशयेद्देवि राजरोगः प्रणश्यति १६ पुत्रश्च जायते देवि ग
र्भभ्रष्टं न जायते काकवंध्या च वै पुत्रं लभते नात्र संशयः १७ इति श्री कर्मविपाकसंहितायां गौरीहरसंवादे हस्तनक्षत्रस्य चतुर्थचरणा
प्रायश्चित्तं नाम पंचपंचाशत्तमोऽध्यायः ५५ श्रीशिव उवाच गंगापुण्यां महादेवि विप्रो ह्येको वसत्सदा कृषिकर्मरतो नित्यं धनाढ्यः कृपणाः
शठः १ स्त्रियां तु चंचलौ तस्य द्वौ पुत्रौ चापि जग्मतुः कन्या चैका विशालाक्षी जाता तस्या वरानने २ उद्वाहं तु विना देवि कन्यका व्यभिचारि
णी महिषीपुत्रघातं च प्रसह्य सापि कारयेत् ३ अनेनैव प्रकारेण वयः सर्वं गतं प्रिये तत्र जलसर्पेण वै दृष्टस्ततो मृत्युरजायत ४ यमदूतैर्महापा
रे निक्षिप्तो नरकार्णवे यमाज्ञया सह स्त्रीणि निस्सृति वरानने ५ भुक्त्वा कष्टं विशालाक्षि गर्दभत्वं ततोऽभवत् विडालत्वं ततो देवि मानुषत्वं
पुनर्भवेत् ६ मध्यदेशे विशालाक्षि पुत्रेणैव प्रजायते पूर्वजन्मनि वै देवि कन्या कारजताप्लुता ७ विवाहिता वरारोहे रंडाहीना च कामिनी



॥

कर्म महिषीपुत्र घातात्वरोगोत्पत्तिश्च जायते ८ कृपरान्त्या द्दिशालाक्षि पुत्रस्य मरणं भवेत् अस्य पापस्य शांत्यर्थं शृणुष्व वरानने ९ स्ववि
२१ त्तस्याष्टमं भागं ब्राह्मणाय प्रदेत्ततः एकादश सा च गा देवि स्वर्णशृंगीश्च सवत्सकान् १० सवलक्षणसंयुक्तां वस्त्रयुक्ता विभूषितां ब्राह्मणाय त
दा दद्यात् रूप्यादानं विशेषतः ११ गायत्रीजातवेदाभ्यां अयुतं जपमाचरेत् हवनं तद्दशांशेन तर्पणं मार्जनं ततः १२ पृथिवीमध्ये वरारोहे पंच वृ
क्षस्य वाटिका कारयामास यत्नेन विष्णुवृक्षादिभिर्वृता १३ भोजयेत्सहस्रं च षष्टिं च ब्राह्मणान्वेदपारगान् निष्कत्रयं सुवर्णस्य प्रतिमां वस्त्र
भूषितां १४ ब्राह्मणाय ततो दद्यात् द्विसुपादेन संयुतां एवं कृत्वा विशालाक्षि पूर्वजन्मकृतं च यत् १५ पापं प्रणश्यते देवि नान्यकार्यविचा
रणा पुत्रान्वै जायते तस्य शूरान्बुद्धिसमन्वितान् १६ सर्वरोगाः क्षयं यान्ति काकवंध्या लभेत्सुतं १७ इति श्रीकर्मविपाकसंहितायां चित्रान
क्षत्रस्य प्रथमचरणप्रायश्चित्तो नाम षट्पंचाशत्तमोऽध्यायः ५६ श्रीशिव उवाच पुण्येन जायते पुत्रः पुण्येन लभते श्रियं पुण्येन रोगना
शः स्यात्सर्वशास्त्रस्य संमतं १ मध्यदेशे विशालाक्षि ब्राह्मणो वसति प्रिये शरज्वाद्दक्षिणे तीरे कालिकापुरशोभिते २ तत्र कालीपुरे रम्ये
द्विजो वसति वै शठः स्तेयवेश्यापरस्त्रीणां रतिसंसर्गतत्परः ३ मद्यपानं विना देवि निद्रा तस्य न जायते तस्य पत्नी शुभा नाम्नी पतिसेवापराय
णा ४ प्रत्यहं पूजयेद्विप्रं स्वमतिपापकारिणी ततो वृद्धदिने जाते मरणं व्याघ्रतो भवेत् ५ तस्य पत्नी सती जाता श्रुत्वा चैव प्रदस्थता सत्यलो
लोके ततो देवि कल्पमेकं प्रभुज्यते ६ पत्न्या सह वरारोहे ततः पुण्यक्षये सति मृत्युलोके भवेज्जन्म कुले महति पूजिते ७ धनधान्यसमायु
तो बाल्ये वै रोगवान्सदा पूर्वसंबंधयोगेन प्राप्तपत्नी च या स्थिता ८ पुनर्विवाहिता देवि पुत्रकन्याविवर्जिता अस्य पापस्य शांत्यर्थं
घ शृणु वरानने ९ गृहवित्तं दशांशं च पुण्यकार्यं चकारसः गायत्रीमूलमंत्रेणाष्टलक्षं जपमाचरेत् १० हवनं तद्दशांशेन तर्पणं मार्जनं ततः
दशवर्णान्ततो दानं भूमिदानं विशेषतः ११ गोविंदेति सदा नाम जपेन्नित्यं वरानने प्रातःस्नानं सदा कुर्यान्माघकार्तिकमासयोः १२ हरिवंश
श्रवणं देवि व्रतमेकादशी ततः एवं कृत्वा वरारोहे सर्वरोगक्षयं भवेत् १३ पुत्रश्च जायते देवि नान्यकार्यविचारणा १४ इति श्रीकर्मविपा कर्म
कसंहितायां चित्रानक्षत्रस्य द्वितीयचरणप्रायश्चित्तो नाम सप्तपंचाशत्तमोऽध्यायः ५७ श्रीशिव उवाच अयोध्यापुरतो देवि द्विजो जनम २१

यदृच्छिता सध्यमेणुविवोनंपुरंभुविमनोहरं १ तत्र वैश्यो वसत्येकः स्वकर्मनिरतः सदा धनाढ्यो रूपसंपन्नो द्विजसेवाचतत्परः २ कस्या
णं नाम विख्यातं विक्रयं स ततं करोत् लक्ष्मीनाम्नासदाख्याता तस्य पत्नी च स्वैरिणी ३ पतिं न पूजयेद्देवि रूपगर्वचसा तदा महिष्यो बहवः सं
ति गावश्च विक्रयकारणात् ४ महिषीपुत्रघातं च प्रसह्यं जायते खलु छागस्य विक्रयं नित्यं छागानां चैव बंधनं तथा ५ गोपशूद्रो महाप्राज्ञो धना
ढ्यः स्वर्णसंयुतः तत्र जातो महादेवि वैश्यभिन्नो हि बाल्यतः ६ तस्य गेहे स्थितो गोपो धनधान्यसमावृतः वैश्यपत्नी ततो देवि गोपं प्रति तदाभ
वेत् ७ एवं बहुगते काले तस्य गोपस्य वै मृतिः वैश्यगेहे महादेवि धनं गोपस्य पल्लिस्थितं ८ वैश्येनैव हृतं सर्वं व्ययं सर्वं यतः कृतं ततः सर्वं वयो
यातो वैश्यमृत्युरभूत्तदा ९ गंगायां च विशालाक्षी पत्निसापिमृता तथा वैश्यस्यैव भवेत्स्वर्गं वर्षषष्टिसहस्रकं १० वैश्यपत्नी ततो देवि नरके
कर्द्दमे तथा वर्षषष्टिसहस्राणि भुक्त्वा विविधयातना ११ नरकान्निसृता सा तु सर्पयोनिमजीजनत् ततः स्वर्गफलं भुक्त्वा मानुषत्वे ततो भवत्
१२ धनधान्यसमायुक्तो रूपवान् अतिथिप्रियः बहुधर्मी गुणी ज्ञानी पुत्रकन्याविवर्जितः १३ सर्पयोनिं ततो भुक्त्वा गंगायां मरणं खलु शूद्रं प्रति स
दा स्नेहमतः शूद्रस्तदाभवत् १४ वैश्यस्य शूद्रजातित्वं पूर्वस्नेहफलाद्यतः पत्नी सा च समायाता पूर्वसंबंधकारणात् १५ अदत्तं द्रव्यनादत्तं स
वैश्यशूद्रस्य वैभवेत् ततोऽस्यैव समुत्पन्ना बहुकन्या सुरेश्वरी १६ महीषीपुत्रघाताच्च वायुरोगादयस्तथा स्वपतेर्वचनं हत्वा परपुंसी रता यदा १७
तदा पुत्रस्य मरणं गर्भपातः पुनः पुनः अस्य शांतिमहं वक्ष्ये शृणु देवि वरानने १८ गृहवित्तषडंशेन पुण्यकार्यं प्रयत्नतः वापीकूपतडागादी
पथिमध्ये च कारयेत् १९ शिवस्य पूजनं नित्यं शिवभक्तिमहर्निशं वायवायप्रियमंत्रे सर्वपापप्रणाशनं २० देहांते मुक्तिदं देवि मर्त्यलोके
च कामदं होमं च कारयामास भक्त्या देवि सुसुंदरं २२ चतुरस्रे विशालाक्षी तिलधान्यादितंदुलैः धूम्रवर्णां ततो गां च दद्याद्देवि दिने तथा २२ नि
क्षमाचं ततः स्वर्णं ब्राह्मणाय प्रदापयेत् एवं कृते न संदेहो व्याधिनाशं भवेद्ध्रुवं २३ पुत्रं च जायते देवि दुर्गर्भेन न स्पृशेत् काकवंध्यापुनःप्रज
स्रुपते नात्र संशयः २४ इति श्रीकर्मविपाकसंहितायां चिज्ञानस्थलस्यतनीपचरणप्रायश्चित्तो नाम अष्टपंचाशत्तमोऽध्यायः ५८ श्रीशिवउ
वाच देशे पुरापतमे देवि प्रतिष्ठाने सुरेश्वरि ब्राह्मणो वेदविप्रशोऽन्नवासमकारयेत् १ सुरामांसस्य वै भोक्ता मस्यं निरंप्रमत्पने घूते

क॰मं॰ नैवविशालाक्षि व्ययं कृत्वा दिने दिने २ तस्य स्त्री परमा नाम्नी ह्यत्यन्तातीव सुंदरी परपुंसि रता नित्यं निर्भया पतिवंचका ३ एवं सर्ववयोजाते ना
२२ श्चो मृत्युरभूत्तदा गंगायां उत्तरपक्षे नैवेदेवगंधर्वपूजिते ४ तस्य विप्रस्य वै स्वर्गे दिव्यकन्याभिरावृते भुक्तं बहुविधं सौख्यं देवगंधर्वसेवितं ।
५ ततः पुण्यक्षये जाते मर्त्यलोके सुरेश्वरि महाद्विजकुलसंपूर्णे तस्य जन्म मजीजनत् ६ पुनः कर्मवशाद्देवि सा भार्या व्यभिचारिणी पुनर्वि ।
वाहिता देवि पुत्रस्तस्या न जायते ७ मद्यपानादिकं पापं पूर्वजन्मनि यत्कृतं तत्फलेन महादेवि व्याधिग्रस्तो सदा भवेत् ८ अथ शांतिं प्रव ।
क्ष्यामि येन पापक्षयो भवेत् गायत्रीमूलमंत्रेण लक्षजाप्यं वरानने ९ हवनं तद्दशांशेन तर्पणं मार्जनं तथा देवस्याराधनं नित्यं सूर्यस्य व्रत
माचरेत् १० प्रयागे नियतस्नानं प्रतिमाघे यथाविधि पत्न्या सह विशालाक्षि पूर्वपापं विनश्यति ११ षडंशं वै ततो देवि ब्राह्मणपवरानने
दद्याद्दूर्षणा महता गां च दद्यात्पयस्विनी १२ गर्भलाभे तु पुत्रश्चिरंजी न मृतमे १३ इति श्रीकर्मविपाकसंहितायां चित्रगुप्तसनत्स्य चतुर्थच
रणप्रायश्चित्तो नाम नवपंचाशत्तमोऽध्यायः ५९ श्रीशिव उवाच कान्यकुब्जप्रदेशे तु राजाप्यकोवसस्तुरा राजधर्मरतः शांतः प्रजापालनत
त्परः १ रुद्रशर्मेति विख्यातो भार्या तस्य प्रभावती एकस्मिन्दिवसे देवि ब्राह्मणो भयपीडितः २ शरणं याचयामास शरणार्थी द्विजोत्तमः
तस्य भार्या महादेवी स्वरूपा त्वतिसुंदरी ३ राजपुत्रेण बाल्येन तस्या हरणमाचरेत् शरणागत वा राजपुत्रस्नेहेन यंत्रितः ४ एवं बहुगते का ॠ॰
लेन पयस्य मरणं यदा तदा यमाज्ञया दूतैः क्षिप्तं नरककर्दमे ५ षष्टिवर्षसहस्राणि नरके परिपच्यते ततो वै नरकाद्देवि निष्क्रांतः सूकरो भवत्
६ पुनः शृगालयोनिं वै मानुषत्वं ततो भवत् धनधान्यसमायुक्तो बहुलो गुणवानपि ७ पुनर्विवाहिता पत्नी नाम्ना तस्य प्रभावती पूर्वकर्म
फलाद्देवि तस्याः पुत्रो न जायते ८ शरीरे सततं देवि ज्वरेण सुताडितं वातपित्तकफानां च पीडा मध्ये च जायते ९ अस्य दानं शृणुष्व त्वं
हि प्रथ पापक्षयं यथा गृहवित्ताष्टमं भागं पुण्यकार्ये चकार सः १० वापीकूपतडागानां जीर्णोद्धारे यदा भवेत् तदा पापक्षयं याति पूर्व
जन्मकृतं ध्रुवं ११ विष्णोरष्टमंत्रेण जपं कुर्याद्द्वि-द्विसहस्राः अथवा कारयामास दद्याद्गां कपिलां शुभां १२ सवत्सां वस्त्ररत्नाद्यां घंटाभरणभू
षितां ग्रहणे चंद्रसूर्यस्य काम्यस्नानं समाचरेत् १३ निष्कत्रयं सुवर्णस्य कमलं कारयेत्ततः ब्राह्मणाय वरारोहे प्रदद्यात्कमलं शुभं १४ एवं

कृते वरारोहे सर्वपापक्षयं भवेत् अपि वंध्या लभेत्पुत्रं चिरंजीविनमुत्तमं १५ सर्वरोगक्षयं याति नात्र कार्या विचारणा १६ इति श्रीकर्मवि
पाकसंहितायां स्वातिनक्षत्रस्य प्रथमचरणस्य प्रायश्चित्तो नाम षष्टितमोध्यायः ६० श्रीशिव उवाच गंगायां दक्षिणे कूले विंध्ये नगवरो
त्तमे द्विजोप्येको वसद्दे विप्रलकर्मविवर्जितः १ अनाचाररतो मूर्खः परस्त्रीलंपटः शठः व्यापारः क्रियते नित्यं गोहिरण्यगजादिकं थ
वहुद्रव्यं भवत्तस्य वहुकोटिप्रमाणकं २ व्ययस्य संग्रहो नित्यं न भुज्यति न दास्यति ३ स्वभार्यां चैव परित्यज्य पुत्रभार्या द्विजो रतः धनेश्वर इ
ति ख्यातं तस्य नामप्रभवत् ४ ततो वहुगते काले तस्य मृत्युरभूत्किल यमदूतेन वैवध्वा निक्षिप्तं नरकार्णवे ५ महाघोरे सुरश्रेष्ठे
कल्पमेकं तदावसत् पुनर्व्याघ्रस्य वै योनिं मृतवत्सत्वमाप्नुयात् ६ महारोगसमायुक्तो न सुखं लभते क्वचित् अस्य शांतिं प्रवक्ष्यामि शृ
णु देवि वरानने ७ गायत्रिमूलमंत्रेण दशलक्षं जपं तदा दशांशहवनाद्यादि तदा पापक्षयं भवेत् ८ गोविंदस्य सदा ध्यानं सदा गोवि
दकीर्तनं नित्यं प्रपूजयेद्देवं शंखचक्रगदाधरं ९ पीतांवरधरं श्यामं श्रीवत्सेन विराजितं प्रत्यव्दं कार्तिके मासी तुलसी विष्णुरूपिणी १०
दीपदानं च नियतो भार्यया सह दापयेत् गोदानं शास्त्रवैरीत्या ततो दानं वसुंधरा ११ यथाशक्त्या च भो देवि ब्राह्मणाय शिवालये एवं कृ
ते न संदेहो पूर्वजन्मकृतं च यत् १२ तत्पापं नाशमायाति सर्वरोगक्षयं भवेत् वंध्यत्वं प्रशमं याति पुत्रलाभ भवेद्ध्रुवं १३ काकवंध्या पुनः पु
त्रं लभते नात्र संशयः १४ इति श्रीकर्मविपाकसंहितायां स्वातीनक्षत्रस्य द्वितीयचरणस्य प्रायश्चित्तो नाम एकषष्टीमोध्यायः ६१ श्री
शिव उवाच कुरुक्षेत्रे महादेवि वैश्यो वसति प्रिये कृषिकर्मरतो नित्यं कूपं वै कारयेत्ततः १ गोमहीष्याश्ववृषभं संग्रहं क्रियते वहु
तस्य भार्या वरारोहे परपुंसरता सदा २ संग्रहं वहुद्रव्याणां न दानं क्रियते क्वचित् एकस्मिन्समये देवी चंद्रपर्व सुरेश्वरी ३ दशवर्णांतदा
नं कृतं क्षेत्रे तदा किल ततो वहुगते काले तस्य मृत्युरभूत्किल ४ यमदूतेन भो देवि निक्षिप्तं नरके तदा एकविंशसहस्राणां भुक्त्वा नरक
यातना ५ पुनर्माहिषयोनिं वै प्राप्तः खलु वरानने पुनर्मनुष्ययोनिं वै धनधान्यसमन्वितः ६ पतिः खलु वरारोहे पुत्रकन्याविवर्जितः।
रोगवान्नात्र संदेहो जंघे पीडा ततोधिका ७ तस्य शांतिं प्रवक्ष्यामि शृणु देवि यथा तथा षडंशे च ततो दानं विप्राय विदुषे तथा ८ गा

पत्नीलक्षजाप्यैस्ततोहोमंप्रकल्पयेत् गामेकांकपिलांदद्यात्स्वर्णशृंगींसहांबराम् ९ ब्राह्मणान्भोजयेत्पंचाशत्संख्यान्भोजयेत् एवंकृ
तेनसंदेहःशीघ्रंपुत्रमवाप्नुते १० सर्वे तेगामयंयांनिनात्रकार्याविचारणा ११ इतिश्रीकर्मविपाकसंहितायांस्वातीनक्षत्रस्यतृतीयचरण
स्यप्रायश्चित्तोनामद्विषष्टितमोध्यायः ६२ श्रीशिवउवाच हस्तिनापुरंरम्यंतत्रशुभ्रंतच्चमनोहरं वसंतितत्रवहवोनराःसर्वेविचक्षणाः
१ तत्रधर्मध्वजोविप्रोहिधर्मात्माज्ञानवान्सदा स्वधर्मकर्मणाकृत्वाव्यपर्युष्योद्विजैः २ तस्यपुत्रद्वयंजातंद्वौचपापरतौशठौ प्रसह्यजीवघा- द्विन
तेनसद्यवेश्यारतेरतो ३ ष्यूतेनैवमहादेवविपात्राववहू नगच्छति नचवारपितुर्वाक्यः शूद्रस्त्राप्यांसदाशिवे ४ ततस्तुदैवयोगेनप्रयागंशूद्रआ
गतः मासमेकंतुतत्रस्थित्वातस्यमृत्युरभूत्किल ५ विप्रदासस्ततोलब्ध्वायुक्तोलोकंवरानने विमानवरमारुह्यपार्षदैःसहवरानने ६ तस्यभार्या
विशालाक्षीमर्त्यलोकेसुरेश्वरि साभवद्विधवानारीकिंचित्कालंगतेसति ७ परपुंसिरतायाताश्रयंस्वव्यभिचारिणी ततोवहुगतेकालेतस्य
मृत्युरजायत ८ यमदूतैर्महाघोरैःक्षिप्तवोल्वसणैःपि विशत्यब्दसहस्राणिनरकेपरिभुज्यते ९ शूद्रःपुण्यप्रभावेणजातोमर्त्यलोकेसु
रेश्वरि जन्मचैवभवेद्विप्रमध्यदेशेसुरेश्वरि १० तदासानुभवेन्नारीपुरायाव्यभिचारिणी पूर्वजन्मप्रसंगाच्चवंशश्रेष्ठोहिजायते ११ रोगं
वजापतेनाभ्यांकष्टंचैवदिनेदिने अतःपापस्यवैशुद्धिंतस्यासाधनंवैशृणु १२ स्वर्णवृषस्यवैकृत्वासांगुष्ठपरिमाणकं फलपुष्पसमायु-
क्तोपलंपंचदशस्यतु १३ तस्यवृक्षस्यवैमूलेशालिग्रामशिलांशुभां पूजइत्वाविधानेनविष्णुरूपंवरानने १४ ब्राह्मणायततोदद्याद्गांचदद्यात्स
पस्विनी गायत्रीमंत्रजाप्येनलक्षमेकंचकारयेत् १५ इतिश्रीकर्मविपाकसंहितायांस्वातिनक्षत्रस्यचतुर्थचरणप्रायश्चित्तोनामत्रिषष्टि
तमोध्यायः ६३ श्रीशिवउवाच कपिलेनगरेदेविक्षत्रीवसतिवैपुरा क्षत्रधर्मविहीनश्चवैश्यकर्मरतःसदा १ प्रसह्यवैश्यकर्मणाव्य-
पहृत्वादिनेदिने वहुद्रव्यंतदातेनसंचितंनीलवर्मणा २ महालोभेनसंयुक्तोधर्मकर्मनकर्हिचित् पत्नीपुत्रेकठोरत्वंताभ्यामन्नंनदीय
ते ३ एवंवहुगतेकालेसर्पेणैवहतःसवै कुंभीपाकेमहाघोरेयमदूतैःमहाशिवे ४ निक्षिप्तःपूर्वंखलांवध्वाततोमहतियातनां भोगमेकं
चराणेहेकष्टंभुक्तंसुदारुणं ५ ततोभूयस्तदादेविमाहिषंवृषभंहयं सपुनर्मानुषंभूत्वातस्यभार्यापुराचया ६ विवाहितावलाद्वेवि

तस्याः पुत्रं न जायते पुत्रश्चेत्काभवेत्कन्या पुनः सूतिविवर्जिता ७ रोगो भवति वैदेहे मध्ये मध्ये ज्वरो भवत् अस्य शांतिं प्रवक्ष्यामि शृणु देवि वरा
नने ८ कृत्वा हेमवृषं देवि सांगुष्टपरिमाणकं सुवर्णस्य महादेवि पलं दशमितं तदा ९ रौप्यस्य वत्सकं तावेदीपलं पंचदशस्य ताम् मंत्र दृष्ट
समाप्य फलपुष्पेण संयुतां १० अष्टम्यां वा चतुर्दश्यां नवम्यां वा सुरेश्वरि तस्य वृक्षस्य वै मूले वृषकेतुं सुरेश्वरं ११ स्नापयेद्देवमीशानं मम
त्वं गिरिजे वरे पूजयित्वा यथाशक्त्या गंधधूपादिभिस्तथा १२ शाष्टांगं दंडवत् नत्वा देवदेवं समापयेत् मंत्रेणानेन भो देवि विसर्जनमथाचरेत् १३
ॐ नमो शिवाय देवाय शिवाये सततं नमः मम पूर्वकृतं पापं जन्मजन्मसमुद्भवं १४ तत्सर्वं क्षम्यतां देव देव्या सह वरानने ततो वै पूजयेद्दे
वं वेदज्ञं लक्षणोपेतं १५ पट्टवस्त्रोपलंकारैर्विविधैर्मोदकैरपि ततो वृषं सवेदीकं कपिलां गां सवत्सकां १६ ब्राह्मणाय ततो दद्यात्सर्वपा
पविशुद्धये व्रते मम महादेवि शिवरात्रिविशेषतः १७ आजन्ममरणाद्देवि व्रतं कुर्यात्प्रयत्नतः एवं कृते महादेवि शीघ्रं पुत्रं प्रजायते १८ सर्व
रोगक्षयं याति काकवंध्या लभेत्सुतं मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमं १९ इति श्रीकर्मविपाकसंहितायां विशाखानक्षत्रस्य प्रथमच
रणप्रायश्चित्तो नाम चतुःषष्टितमोऽध्यायः ६४ श्रीशिव उवाच विशाखायां महादेवि ब्राह्मणो वेदपारगः भ्रष्टाचारस्ततः शांतो विष्णुचक्रे
णलांछितः १ न वेदं पठते देवि न विप्रं स्पृशते क्वचित् द्विजानां स्मार्तवृत्तीनां विदूषं प्रसहं करोत् २ शिवशक्तिरतानां च नाभिवादनमाच
रेत् एवं व्ययोगतो देवि वृद्धो जातो वरानने ३ मरणं तस्य वै जातं ब्राह्मणस्य वरानने यमदूतैर्महाघोरैर्नरके क्षिप्तवांस्तदा ४ रौरवे नमहाघोरे ष
ष्टिवर्षसहस्रकं भुक्त्वा च विविधं कर्म पुनर्जातः सरीसृपः ५ मानुषत्वं पुनर्जातं कष्टानि विविधानि च सुतस्य मरणं कांते प्रतिवर्षं भवत्स
नः ६ पुनस्त्री काकवंध्या भूत्पूर्वजन्मप्रपंचतः धनधान्यसमायुक्तो न सुखं लभ्यते क्वचित् ७ अथ वक्ष्ये महादेवि पूर्वपापनिवृत्तये ॥
अष्टोशर्पं गृहं देवि ब्राह्मणाय प्रकल्पयेत् ८ गायत्रीजाप वेदाभ्यां दशायुतजपं ततः कूष्मांडनारिकेलं च पंचमूलसमन्वितं ९ गंगामध्ये
प्रदानं च पूर्वपापविशुद्धये निष्कत्रयं सुवर्णस्य कर्मजं निर्मितं शुभं १० दद्याद्देवि विदेदे विप्राय ब्राह्मणाय सुपूजिते एवं कृते भवेद्देवि पूर्वपा
पविशुद्धतः ११ पुत्रं च जायते देवि चिरंजीविनमुत्तमं व्याधयः प्रशमं यांति ज्वराश्च विविधास्तथा १२ काकवंध्या पुनः पुत्रं लभेत

कर्म नात्रसंशयः १३ इतिश्रीकर्मविपाकसंहितायांविशाखानक्षत्रस्यद्वितीयचरणेप्रायश्चित्तोनामपंचषष्टितमोध्यायः ६५ श्रीशिवउवाच ॥
२४ विदर्भनगरेदेविक्षत्री लोकोवसत्पुरा तेजवर्मेतिविख्यातोद्विजानांहितिहारकः १ प्रजानांदुःखदोनित्यंवेदानांचैवनिंदकः तस्यत्रासवशात्सर्वे प्रजा
ग्रामासत्याजिताः २ एवंबहुगतेकालेतस्यमृत्युरभून्किल यमदूतैर्महाघोरेनरकेक्षिप्तवांस्ततः ३ द्विसप्ततिसहस्राणिवर्षाणिनरककर्दमे भुं
क्तेविविधंदुःखंभूचीमुखसमावृतः ४ नरकान्निःसृतोदेविगृध्रत्वंततोभवत् शशत्वंपुनर्देविमानुषत्वंततोभवत् ५ तस्यभार्याभव
द्वंध्यापूर्वजन्मफलागतः तस्यगात्रेभवेद्रोगोरक्तमेषोद्भवस्तथा ६ नसुखंलभ्यतेदेविचिंतयाव्याकुलेंद्रियः ७ एतत्सर्ववरारोहेपूर्वपापस्य
निग्रहं ७ दशांशंयद्गृहेदेविब्राह्मणायसमर्पयेत् वापीकूपतडागादिप्रथिमध्ये प्रकल्पयेत् ८ गृहदानंततोदेविसर्ववस्तुसमन्वितं प्रदद्या
द्विदुषेदेविब्राह्मणायवरायच ९ आकृष्णेतिजपंदेविलक्षमेकंप्रकारयेत् होमंवैकारयामासतिलाज्यमधुतंडुलैः १० ततोगांकपिलांदेविब्रा
ह्मणायप्रपूजितां प्रदद्याद्विधिवच्चैववस्त्रालंकारभूषितां ११ सुवर्णनिष्कमात्रंतुब्राह्मणायततोददेत् एवंकृतेवरारोहेरोगनाशोभवेद्ध्रुवं
१२ पुत्रंचजायतेदेवि वंध्यत्वंचप्रशाम्यति कार्यंव्याप्तमेतन्नात्रकार्याविचारणा १३ इतिश्रीकर्मविपाकसंहितायांविशाखानक्षत्रस्य
तृतीयचरणेप्रायश्चित्तोनामषट्षष्टितमोध्यायः ६६ श्रीशिवउवाच शय्यापुर्यांमहादेविवैश्यैकःस्त्रीसन्निष्ठति संभूरश्वपतीमानीदेव
तातिथिपूजकः १ तस्यभार्याविशालाक्षीशीलानाम्नीवरांगना ब्राह्मणातिथिदेवानांपूजनेचातितत्परा २ एकस्मिन्समयेदेविहेम
कारस्तदागतः सचाद्यःस्वर्णसंयुक्तोहेमकारस्तदावसत् ३ तयोःप्रीतिरभूद्ग्रामेस्वर्णकारस्तदाप्रिये क्षत्रियायधनंमित्राय शतंस्वर्ण
स्यवैपलं ४ प्रदत्तेहेमकाराणांचान्यत्स्वर्णसमर्पितं अन्यांतरेमहादेविस्वर्णकारस्तदामृतः ५ ईर्ष्याःसर्पिणात्पोतोत्रेणस्वर्णकारमपुत्रिणं ॥
स्वर्णंसर्वंगृहीत्वातुप्रभुत्वंक्षत्रियेणतु ६ पुत्रदारेणसंयुक्तःकिंचिद्दानंनकल्पितं ततोबहुगतेकालेतस्यमृत्युश्चजायते ७ क्षत्रियस्य
नदादेविसुरलोकंततोपयौ सौख्यंसुरांगनासार्द्धंषष्टिवर्षसहस्रकं ८ ततःपुण्यक्षयेजातेमर्त्योभवतिभामिनि धनधान्यसमायुक्ताभा राम
र्याभवतियापुरा ९ नभवेत्सुतकन्याचतस्याखल्वरानने गर्भंनजायतेदेविनसुखंजायतेखलु १० रोगग्रस्तंभवेद्देविनसुखंजायतेखलु ॥ २४

कर्म पापेन भो देवि शरीरे महती व्यथा पतिद्वयं च संप्राप्तं नद्रूतंप तिनेयत्नतः ८ तेन यातः सुतो देवि ऋणसंबंधकारणात् घृतो वैश्यस्ततो नित्यं पितृमातृ
२५ विरोधता ९ पुत्रा रूपोपि द्राजानो तदा मृत्युश्च जायते :पुनः पुनस्य संदेहं काकवंध्यात्वमाप्नुयात् १० यस्मात्तस्य वरारोहे मृतवत्साः पुनः
पुनः अस्य शांतिमहं वक्ष्ये शृणु देवि प्रयत्नतः ११ गृहवित्ताष्टमं भागं पुण्यकार्यं चकार सः सूर्यमंत्रस्य वैजा
प्यं वैदिकस्य वरानने। आकृष्णेति महामंत्रं सर्वव्याधिविनाशनं सर्वकामप्रदं देवि मोक्षदं मुक्तिकारकं १३ सूर्यदेवस्य यो भक्तिं कुरुते
नियतः शिवे न किंचिद्दुर्लभं तस्य पुत्रं तो धनं तो पि वा १४ ममातीव प्रियो नित्यं सूर्यदेवमुपासकः मरुणास्तस्य रक्षति यत्कलौ। मन्त्रा
लारविः १५ कमलमुज्वलं देवि वसुपत्रं सुशोभनं तस्योपरि सुवर्णस्य सूर्यं रत्नविभूषितं १६ पलं पंचमितं देवि मंत्रेणानेन पूजयेत् नमः
सूर्याय देवाय भद्राय रुद्ररूपिणे १७ पूर्वजन्मकृतं पापं मम पापं व्यपोहतु प्रतिमां पात्रसंयुक्तां ब्राह्मणाय प्रदापयेत् १८ ततो गां कपिलां
शुभ्रां सवत्सां स्वर्णभूषितां ब्राह्मणाय ततो दद्यात् सद्वस्त्रेणाच्छादितां १९ रविसप्तमीव्रतं कुर्यात्पत्न्या सह वरानने पूर्वजन्मकृतं पापं
नश्यत्येवं कृते शिवे २० रोगं सर्वं क्षयं याति पुत्रलाभं भवेद्ध्रुवं काकवंध्या पुनः पुत्रं मृतवत्सा च पुत्रिणी २१ इति श्रीकर्मविपाकसंहि
तायां अनुराधानक्षत्रस्य द्वितीयचरणप्रायश्चित्तो नाम नवषष्टितमो ध्यायः ६९ श्रीशिव उवाच सुकर्मपुरविख्याते सौराष्ट्रे द्विपाशो।
भिते तत्र तिष्ठति वै विप्रो ब्रह्मकर्मविवर्जितः १ किंक्रियं कुरुते नित्यं गजवाजीद्विजादिकं राजभ्रष्टत्वमासाद्य ग्रामदाहं तदाकृतं २ ग्रा
ह्मणा बहवस्तत्र ब्राह्मणश्च सदाशिवे मृता ग्रामस्य वै दाहे गावश्चैव बहवो मृता ३ ततो बहुगते काले मृतः सोपि द्विजाधमः ततस्तु य
मदूतेन नरके घोरसंज्ञके ४ यमाज्ञया च निक्षिप्तं कष्टं भुक्तं सुदुःखिरः नरकान्निःसृतो देवि गजयोनिं ततो भवत् ५ बकयोनिं पुनर्गीतं का
कयोनिं ततो भवत् मनुष्यस्य पुनर्योनिं कुले भवति शोभने ६ सर्वसंपत्तिसंयुक्तो वंशं तस्य न जायते कन्याबहुसमायुक्तो रोगयुक्तो भवेत्सु
नः ७ भार्या तस्य ज्वरग्रस्ता मासे वर्षे भवेज्ज्वरं अस्य शांतिं प्रवक्ष्यामि यत्नोप्येहसुखी भवेत् ८ चतुर्भागं गृहद्रव्यं ब्राह्मणाय प्रदापयेत् । प्र
यागे मकरे मासे सह पत्न्या वरानने ९ स्नानं च नियतः कृत्वा पश्चात् च ततो दद्यात् होमं दानं ततः कुर्यात् भूमिदानं च पार्वति १० गायत्रिजा

शांतिं शृणु वरारोहे यतः पापं प्रणश्यति ११ षडंशं यत्नहे देवि ब्राह्मणाय समर्पयेत् दशांशं ततो दद्याद्देवि विधिमाप्नो त्रिणे १२ गायत्री मूल
मंत्रेण लक्षजाप्यं च कारयेत् मक्कान्ननव भो देवि ब्राह्मणं भोजयेच्छतं १३ हंसं स्वर्णस्य वै देवि फलं पुष्पसमन्वितं दद्याद्विप्राय विदुषे पले
दशप्रमाणकं १४ सूर्यस्य पूजनं देवि रविवारे विशेषतः एवं कृते वरारोहे शीघ्रं पुत्रं प्रजायते १५ इति श्रीकर्मविपाकसंहितायां विशालान
क्षत्रस्य चतुर्थचरणप्रायश्चित्तो नाम सप्तषष्टितमोऽध्यायः ६७ श्रीशिव उवाच कल्याणपुरनामानमायापुर्यां विशेषतः तिष्ठन्वणिग्जनो पे
क्रोधनाख्यो धनगर्वितः १ क्रयं च कुरुते नित्यं विक्रयं तु सदा करोत् महालोभवशाद्देवि न ददाति क्रियेते कुचित् २ तस्य भार्या विशालाक्षी पुंश्चली
कुलटाधमा अत्र द्रुपवरारोहे तस्य गेहे वसत्सदा ३ एको पुनरतः पुत्रो द्वितीयो ब्राह्मणीरतः वैश्येनैव विशालाक्षी धनं च बहुसंचितं ४ प्रस
ह्य भुज्यते छागं विक्रयं प्रस्यहे करोत् वृद्धे सति महादेवि वैश्यस्य मरणं भवेत् ५ यमदूतैस्तदा बध्वा निक्षिप्तं नरके तदा स्वरूपं दर्शयामास
तस्मै वैश्याय भोः प्रिये ६ नवतिर्वर्षसहस्राणि घोरे नरकदारुणे कष्टं महानदावाकोह मिभिर्योरूपभिः ७ ततो व्याघ्रस्य वै योनिं काकं च कुक्कु
टं ततः मानुषत्वं ततो जातं पुत्रकन्याविवर्जितं ८ पुनर्विवाहिता सा तु या पत्नी पूर्वजन्मनि रोगवान्सा तु वैरुग्णा मृतवत्सा पुनः पुनः ९ ए
कापसा तदा जाता पुनः पुत्रो न जायते यदा सर्वस्व वै दानं सूर्यस्याराधनं तदा १० गायत्री मूलमंत्रस्य लक्षजाप्यं यदा भवेत् हरिवं
शश्रवणं देवि दुर्गापाठं जपं सदा ११ तदा पुत्रं भवेद्देवि व्याधिनाशं भवेद्ध्रुवं १२ इति श्रीकर्मविपाकसंहितायामनुराधानक्षत्रस्य
प्रथमचरणप्रायश्चित्तो नामाष्टषष्टितमोऽध्यायः ६८ श्रीशिव उवाच मगधे वै समे देशे काश्यपो वसति प्रिये पुत्रपौत्रसमायुक्तो धना
ढ्यो गुणवान्सदा १ यदा चार्धवयो जातं दारिद्र्यं तस्य भवत् पदा ही तं च न द्रव्यं शतं पंच शतं तथा २ व्ययं कृत्वा न दातेन नदत्तं प्रा
तिन दिवे ततस्तस्य भवेन्मृत्युः काष्ठकारस्य माधवे ३ मृत्युः समयकाले तु गोदानं देवि तत्कृतं हे कपिले हा स्वामे कांस्य तारोप
णभूषितां ४ पुत्रेणाविहितं तं कार्यं शास्त्ररीसा गयादिकं यमलोके तदा भ्रातं वर्षं दशसहस्रकं ५ पुनः पुण्यप्रक्ष येजाते कपियोनिस्तदाभ
वत् कर्मसि वैवपुनर्योनिमानुषत्वे ततो भवत् ६ धनधान्यसमायुक्तो गुणज्ञोऽप्यति सुंदरः पूर्वजन्मनि भो देवि काष्ठछेदं यतः कृतं ७ तेन

तवेदाभ्यांत्र्यंवकेति सदा जपं दशायुतप्रमाणेन हवनं मार्जनं तथा ११ ब्राह्मणान्भोजयेद्भक्त्या पक्वान्नैः पायसेन वा ततो विसर्जयेद्विप्रान्द-
क्षिणां दत्त्वा भूपतिः १२ दशवर्णान्ततो दद्याद्गुरवे शास्त्रवर्णितान्ततः एवं कृते महादेवि शीघ्रं पुत्रमवाप्नुयात् १३ काकवंध्या लभेत्पुत्रं पुनर्देवि न संश-
यः सर्वरोगक्षयं याति मृतवत्सा लभेत्सुतं १४ इति श्रीकर्मविपाकसंहितायां अनुराधानक्षत्रस्य तृतीयचरणप्रायश्चित्तं नाम सप्ततितमोऽध्यायः ७० त
श्रीशिव उवाच वंदीजनो वसत्येकः सौराष्ट्रनगरे शुभे सकविर्भाग्यवान्देवि स्वकर्मनिरतः सदा १ तस्य स्त्री सुंदरी देवि पतिसेवापरायणा एकस्मि-
न्नगरे कश्चित्ब्रह्मचारी तदागतः २ आतिथ्यकरणे तस्य चाश्रमान्नागतः शिवे उपोषणं कृतं तेन द्वारे वंदिजनस्य वै ३ ततः प्रभाते देवि शिशापं द-
त्वा गतः शिवे ततस्तु दैवयोगेन मार्जारी तत्र सूतिका ४ पंचपुत्रान्वरारोहे घातितांस्तस्य भामिनी मार्जारी च तदा देवि विषु धातीच मृतांतदा ५ ए-
वं बहुगते काले तस्य मृत्युरभूत्सुरा पत्नी पतिव्रता सा तु सती जाता तु तत्क्षणात् ६ सत्यलोके तदावासं युगमेकं वरानने सौख्यं तत्र वरारोहे विविधं
मानसेप्सितं ७ भुक्त्वा देवांगनासार्द्धं पुनः पुण्यक्षये सति मानुषत्वं ततो लोके सह पत्न्या वरानने ८ धनधान्यसमायुक्तः पुराभार्या विवाहिता पुत्रा-
न्प्रसूता न्सा नारी तेषां मृत्युस्तदाभवत् ९ पुत्राश्च बहवो जातास्तेषां मृत्युः पुनः पुनः साज्वरेण समुद्विग्ना मध्ये तापं पुनः पुनः १० तस्य पापस्य
वै शांतिं शृणु त्वं गिरिजे वरे जातवेदेन मंत्रेण लक्षजाप्यं च कारयेत् ११ विडालीप्रतिमां कृत्वा पंचबालेन संयुतां स्वर्णरौप्यस्य वा देवि पलपंचदश-
प्रयत्नं १२ सवत्सां वै ततो दद्याद्ब्राह्मणाय चरायच गामेकां रक्तवर्णां तां विप्राय समर्पयेत् १३ गयायां पिंडदानेन सोमवारे तथा गुरौ व्रतं चर-
विसत्तम्यां क्रियते पतिना सह १४ तदा पुत्रं भवेद्देवि चिरंजीवि न संशयम् व्याधिनाशं भवेद्देवि वंध्यात्वं च प्रणश्यति १५ इति श्रीकर्मविपाकसंहिता-
यां अनुराधानक्षत्रस्य चतुर्थचरण प्रायश्चित्तो नाम एकसप्ततितमोऽध्यायः ७१ श्री शिव उवाच ब्राह्मणो वसते देवि महाराष्ट्रनगरे वरे सवेदपाठनिर-
तो वेदपाठं सदा करोत् १ तडागं खनयामास तत्र द्रव्यं च लब्धवान् द्रव्यस्यार्थं तदा देवि विप्रद्वं भ्रातरं प्रति २ भ्राता तस्य महादेवि द्रव्यार्थे विषम-
क्षणं बहुकाले गते देवि व्यपसर्वे धनं गतं ३ ततः पंचत्वमापाति ब्राह्मणस्य सुरेश्वरि यमदूतैर्महाघोरे नरके देवि कर्दमे ४ षष्टिवर्षसहस्राणि नि-
सिक्तं च यमात्तया भुक्तं नरकजं दुःखं काकयोनिर्भवे त्पुनः ५ पुनर्भौत्रषेत्रे योनिपुत्रकन्यादिवर्जितं पूर्वजन्मनि भो देवि भ्रातुर्हननत्वा

न् ६ तेनपापेनभोदेविमहारोगसमुद्भवः अस्यदानंप्रवक्ष्यामिशृणुत्वंगिरिजेवरे ७ गृहविनाश्चमंभागंपुण्यंकार्यंचकारसः वापिकूपतडागा
दिजीर्णोद्धारंचयत्नतः ८ प्रतिमांकारयेद्देविस्वर्णपलद्वयस्यतु आनुश्चित्तंतदादेविपूजयित्वायथाविधिः ९ गंधधूपादिभिर्देविभूषणैर्विविधै
स्तथा गायत्रीस्मजाप्येनदशांशंहवनेनच १० प्रयागेमकरेस्नानंसर्वपापक्षयोभवेत् ब्राह्मणायततोदद्याद्गांचदद्यात्पयस्विनीं ११ भूमिंतिलं
शंदद्यात्सुवर्णयोत्रानुयायिनीं अश्वदानंततोदद्याद्ब्राह्मणान्भोजयेत्ततः १२ एवंकृतेतदादेविपुत्रोभवतिनान्यथा व्याधिस्तस्यनिवर्तेतकाकवंध्या
लभेत्सुतं १३ मृतवत्सालभेत्पुत्रंचिरं जीवीनमुतम् १४ इतिश्रीकर्मविपाकसंहितायांज्येष्ठानक्षत्रस्यप्रथमचरणप्रायश्चित्तोनामद्विसप्त
तितमोध्यायः ७२ श्रीशिवउवाच पट्टनेवेपुरेरम्येलोहकारोवसत्पुरा गोवर्द्धनंचनामानंपत्नीचपरमेश्वरी १ धनधान्यसमायुक्तोधर्मकर्मसम
स्तथा तस्यपुत्रद्वयंजातंलोहकारस्यपार्वती २ ज्येष्ठपुत्रस्यवैदेविभार्ययासहितस्यवै निःसारितंगृहाद्देवितस्यकिंचिन्नदीयते ३ एकोपृहेन
नःपुत्रद्रव्यंतस्यप्रयच्छति लोहकारेणभोदेविस्वभार्यापुत्रसंयुता ४ त्यागंकृतंमहादेविगोपालस्यसुकन्यका भार्याकृतःपुनस्तेनस्वपत्नीसा
गवेकृता ५ ततोवहुगतेकालेलोहकारस्यवैशिवे व्याघ्रेणमरणंजातंयमदूतैर्यमाज्ञया ६ निक्षिप्तंनरकेघोरेकृमिसंकुलसंयुते विंशद्वर्षस
हस्राणिभुक्त्वानरकयातनां ७ नरकान्निःसृतोदेविरासभत्वंकुलसंयुतं पुनःसर्पस्यवैयोनिंततोनकुलमेवच ८ मानुषत्वंततोदेविधनधान्य
समाकुलं सशूरश्चकृतज्ञश्चज्ञानवान्राजवल्लभः ९ पुरेचयत्कृतंकर्मतत्प्राप्नोतिनसंशयः पुरावैकार्तिकेमासिपौर्णमास्यांसदाशिवे
१० दशवर्णंकृतंदानंविधिवत्सर्ववल्लभे तेनदानफलेनेहधनाढ्यत्वंप्रजायते ११ कन्यकाचपरित्यज्यपरकीयाततःसवै अतःपुत्रस्यवैमृ
त्युःपुनःपुत्रोप्रजायते १२ कनकांजनपत्नीचतस्यभार्याभवत्खलु काकवंध्याभवेन्नारीपुत्रमेकसमायुता १३ भार्यापुत्रकृतंत्यागंपर
कीयारतोयतः तत्पापेनमहादेविचरणोखंजताभवत् १४ व्याधयश्चसमुत्पन्नाद्दद्रुपामादयस्तथा ख्यातिर्वंशेसमुत्पन्नेभूमिभागंचलभ्य
ते १५ अथशांतिंप्रवक्ष्यामिपूर्वपापविशुद्धये एकादशिव्रतंनित्यंषडंशंदानमाचरेत् १६ षडंगपाठयामासरुद्रपूजनपूर्वकं हरिवंश
श्रवणंदेवि चंडीपाठमनंतरं १७ तिलधेनुप्रदातव्यंसमश्राद्धंविशेषतः एवंकृतेतदादेविपुत्रस्तस्यभविष्यति १८ वंध्यात्वंप्रशमंयातिरा

कर्म सुदेवयोगेन पद्मकारस्य तद्गृहे ६ भोजनार्थं गतो देवि पत्नी चान्नं तदा ददौ भुञ्जाने विविधं चान्नं तत्समये पक्षिबालकाः ७ विष्टां कृतास्तत्पात्रे स्थाप
२७ द्मकारो रुषा खलु कुलायं चक्रे नेभ बालकाघातिनास्तदा ८ एवं बहुगते काले पद्मकारस्य भामिनि गंगायां मरणं जातं भार्यया सहितं तदा ९ स्व
र्गवासं भवेद्देवि पद्मकारस्य वल्लभे सप्ततिर्वै सहस्राणि स्वर्गे भुक्तं फलं बहु १० ततः पुण्यक्षये जाते स्वर्गाद्भ्रष्टो यदा भवेत् मनुष्यस्य भवेद्योनिं गंगा
गंडकमध्ययोः ११ धनधान्यसमायुक्तो विवाहमभवद्यदा पूर्वजन्मनि या भार्या सा तस्य गृहमेधिनी १२ पुष्पयुक्ता भवेत्सा तु गर्भस्य पतनं स्फुटः क व
न्यका नैव जायन्ते पुत्रस्यैव च का कथा १३ ज्वरयुक्तः सदा देवि स्वशरीरे भवेत्खलु सुखं न लभ्यते क्वापि दुःखं यान्ति दिने दिने १४ अस्य शान्तिं प्रव
क्ष्यामि शृणु सर्वं वरानने ग्रहणे सूर्यचंद्रे वा गायत्र्या जपमाचरेत् १५ लक्षमेकं वरारोहे पूर्वपापविशुद्धये गृहवित्ताष्टमं भागं पुण्यकार्ये च कारयेत्
१६ कपिलां गां सवत्सां च ब्राह्मणाय प्रदापयेत् दशवर्णां ततो दद्याद् ब्राह्मणान्भोजयेत्ततः १७ चटकस्याकृतिं कृत्वा सार्भकस्य वरानने रौप्यस्य स्वर्ण
ताम्रस्य पंचविंशपलस्य तु १८ ब्राह्मणाय ततो दद्याद्भूमिदानं विशेषतः हरिवंशश्रवणं देवि भार्यया पापपुत्रस्य तु १९ हवनं तर्पणं कुर्यात् मार्जनं च
ततः परं जातवेदस्य मन्त्रस्य दशांशतो जपस्तथा २० गोपालमन्त्रजाप्येन पुत्रलाभं भवेदनु रोगनाशं भवेद्देवि काकवन्ध्या लभेत्सुतं २१ इति श्री
कर्मविपाकसंहितायां ज्येष्ठानक्षत्रस्य चतुर्थचरणप्रायश्चित्तो नाम पंचसप्ततितमोऽध्यायः ७५ श्रीशिव उवाच अयोध्यानगरे देवि काय
स्थो वसति प्रिये रामदास इति ख्यातो तस्य पत्नी च देविका १ विष्णुव्रतरतो नित्यं देवब्राह्मणपूजकः स्त्री पतिव्रता तस्य पतिसेवनतत्परा
२ भाग्यवान् सर्ववस्तूनां विक्रेता राजवाजिनां तस्य मित्रोऽभवद्विप्रो ब्राह्मणो वेदपारगः ३ आगतो वै गृहे तस्य प्रेम्णा विप्रस्य वानघे चातुर्मास्य
स्थितं तत्र स्वर्णं शतपलं तदा ४ कायस्थस्य गृहे देवि स्थापितं ब्राह्मणेन वै वाराणस्यां गतो देवि ताभ्यां स्वर्गे प्रजायते ५ शरीरं त्यक्तवान् तत्र ब्रह्म
चारी द्विजस्तथा ततो बहुगते काले कायस्थस्य दरिद्रता ६ तद्धनं ब्राह्मणस्यैव भुक्तं भार्यासुतैः सह पुनर्वै मरणं देवि कायस्थस्य सभार्यया ७ अयो
ध्यायां तदा देवि ताभ्यां स्वर्गमजायत नवतिर्वै सहस्राणि ब्रह्मलोके वरानने ८ भुक्तं सौख्यमनेकं च देवानामपि दुर्लभं ततः पुण्यक्षये जाते मर्त्यलो राम
के सुरेश्वरि ९ मानुषत्वं पुनर्लेभे चोत्तमे च कुले शुभे महाधनेन वै युक्तो वंशहीनो वरानने १० स्वर्णं भुक्तमदत्तं च ब्राह्मणस्य सुरेश्वरि तसापे २७

वैव्याधितथाक्षयं १८ इतिश्रीकर्मविपाकसंहितायांज्येष्ठानक्षत्रस्यद्वितीयचरणप्रायश्चित्तोनामत्रिसप्ततितमोध्यायः ७३ श्रीशिवउवा
च विश्वदेवपुरेदेवि ख्यातेसर्वमनोहरे वसंतिबहवोवर्णाः वणिजश्चवणिग्जनाः १ तन्मध्येशूद्रएकोहितांबूलंचकरोतिसः सुरांपिबतिते
नित्यंतांबूलंविक्रयंतथा २ तस्यपुत्रत्रयंजातंधनंचबहुलंवित्तं ततस्तुदैवयोगेनमहाधनमदेनच ३ ज्येष्ठपुत्रस्यहननंतस्यभार्याहृताखलु
स्वभार्यायैनयानीतातेनशूद्रेणचैवहि ४ पुत्राभ्यांचभवेद्वैरंस्वपत्न्याश्चविशेषतः प्रसह्यपूज्यतेतेनपुत्रपत्नीतथाधमाः ५ एवंबहुदिनेजा
तेतस्यमृत्युरभूच्छिवततोवैनरकेघोरेयमदूतैर्यमाज्ञया ६ निक्षिप्तोवैततोदेविषष्टिवर्षसहस्रकं कृमिभिर्घोरनक्रैश्चभुक्त्वानरकयातनां ७ नरका
न्निःसृतोदेविस्वानयोनिंचजायते ततोवैवृषभयोनिंमानुषत्वंततोभवत् ८ पूर्वजन्मनिभोदेविदशवर्णाहृतावहु तत्फलेनेहभोदेविधनधान्य
युतस्सदा ९ पुत्रस्यपत्नीभुक्त्वातुपुत्रस्यैववधःकृतः तत्पापफलतोदेविस्यपुत्रत्वंज्वरःसदा १० व्याधिशूलंवहुधातास्यस्कंधयोर्महतीव्यथा
सदाचिंतासमायुक्तारात्रौनिद्रानजायते ११ अस्यशांतिमहंवक्ष्येशृणुदेविसमासतः स्वद्रव्यस्यत्रयंभागंगृहीत्वाममवल्लभे १२ कूपंवैखान
यामासतडागंजीर्णमुद्धरेत् पौर्णमासीव्रतंदेविसकलंत्रैगुणीक्रीयते १३ शिवस्यपूजनंलक्षंब्राह्मणोभ्यश्चकारयेत् कृष्णागौश्चैववृषभो
ब्राह्मणायदद्यात्तदा १४ गायत्रीमूलमंत्रेणत्र्यलक्षप्रमाणतः जपंचकारयामासहवनंतद्दशांशतः १५ मार्जनंतर्पणंदेविदशांशेनैवकार
येत् पुत्रस्यप्रतिमांतद्वत्स्वर्णसमायुतां १६ एवंपंचदशांशेनैवनिर्मितांरत्नभूषितां पूजांकृत्वाविधानेनब्राह्मणायददेस्वयं १७ एवंकृतेनसं
संदेहःशीघ्रंपुत्रमवाप्स्यसि व्याधिश्चप्रशमंयातिकाकवंध्यालभेत्सुतं १८ मृतवत्सालभेत्पुत्रंचिरंजीवीनसुत्तमं १९ इतिश्रीकर्मविपाक
संहितायांज्येष्ठानक्षत्रस्यतृतीयचरणप्रायश्चित्तोनामचतुःसप्ततितमोध्यायः ७४ श्रीमहादेवउवाच चतुर्भुजपुरंग्रामंवेगीतःपश्चिमदि
शि पट्टकारोवसद्देविलक्ष्मणोतिचसंज्ञकः १ शिवमंत्ररतोनित्यंशिवपूजनतत्परः तस्यपत्नीविशालाक्षीपतिशुश्रूषिरतासदा २ पुत्राश्चबहवोजाता
धनंचबहुसंचितं क्रयविक्रयधर्मेणव्ययंकृत्वादिनेदिने ३ तस्यगेहेकरोहंसः नटकोनामपक्षिणी एकस्मिन्समयेदेविचांडालत्वात्सपक्षिण
न् ४ बहूनेवयोधितान्नांडानसपक्षांकृतवांस्तदा फलगृह्यसदापक्षीमध्यान्हेवालकान्प्रति ५ भोजनेप्रहरेदेविनिःशेषंकृत्वायतदापिवेतत

कर्म २८ शिंयथानलः १९ इति श्रीकर्मविपाकसंहितायां मूलनक्षत्रस्य द्वितीयचरणप्रायश्चित्तो नाम सप्तसप्ततितमोऽध्यायः ७७ श्रीशिव उवा
च शरयाश्चोत्तरे कूले मंगलं नाम वै पुरं तत्र क्षत्रियवसन्कश्चिन्मधर्मांसं च भुज्यति १ जगदीश्वरनामा च तस्य पत्नी ह राज्ञुभा वेश्यासूनुरते
श्वासीलभश्चोरस्य संगतिः २ प्रसह्य चौरकर्मेण व्ययं कुर्याद्दिने दिने ततो वहुगते काले तस्य मृत्युरभूत्प्रिये ३ सर्पेणापि महादेवि यमदूतैर्य
मान्नया नरके रौरवे क्षिप्तः षष्टिवर्षसहस्रकं ४ नरकान्निःसृतो देवि व्याघ्रयोनिस्ततोऽभवत् मानुषत्वं ततो लिभेक्षु लेमहं निपूजितेष
पूर्वजन्मनि भो देवि दीपदानं ततः कृतं तत्फलेन विशालाक्षी धनाढ्यत्वं प्रजायते ६ मद्यपानफलाद्देवि वेलाज्वरसमुद्भवः वेश्यासुरत ५
संसक्तोयत्कृतं पूर्वजन्मनि ७ तेन पापेन भो देवि पुत्राणां मरणं ध्रुवं मनस्युद्वेगतो नित्यं यतोद्यूतरतः सदा ८ अस्य शांतिं प्रवक्ष्यामि पू
र्वपापविशुद्धये गृहवित्तषडंशेन पुण्यकार्यं च कारयेत्: ९ वापीकूपतडागांश्च पथिमध्ये च कारयेत् गायत्रीमूलमंत्रेण लक्षजाप्यं
वरानने १० दशांशहवनं तद्वन्मार्जनं तर्पणं तथा दशवर्णा ततो दद्यात् वृषभेन समन्विता ११ एवं पापविशुद्धिः स्यान्नान्यकार्या विचारणा
पुत्रं च जायते देवि वंध्यात्वं च प्रशाम्यति १२ मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् काकवंध्या लभेत्पुत्रं निश्चितं नात्र संशयः १३ रोगादि
नाशमायांति व्याधयः संक्षयं तथा १४ इति श्रीकर्मविपाकसंहितायां मूलनक्षत्रस्य तृतीयचरणप्रायश्चित्तो नामाष्टसप्ततितमो ५
ध्यायः ७८ श्रीशिव उवाच मध्यदेशे विशालाक्षि दिंडवं नाम वै पुरं लवणकारो वसत्येको भीमो गुणविचक्षणः १ प्रसह्य लवणं देवि
विक्रयं कितेसदा तस्य पुण्यवती भार्या पुत्रत्रयमजीजनत् २ धनधान्यं वृषं छागं गोमहिष्यादिकं तथा वहुनिसंचितं देवि लवणकारस्य वै ५
गृहे ३ तस्य ज्येष्ठसुतो देवि वेश्यासुरततत्परः एकस्मिन्समये देवि लवणकूपे निशामुखे ४ भार्यया सहितो देवि शिवृषभोपनीतो नदा श्रुत्वा
तेन तदा देवि निशायां नगतोपि सः ५ नयाणां वै भवेन्मृत्युः स्वः काले ज्ञातीना सह भार्या निःसारितानेन वृषभो मृत्युसंयुतो ६ ततः सर्ववयो ५ रामः २९
जातं दृष्ट्वा सति वरानने मरणं तस्य वै जातं लवणकारस्य पार्वति ७ यमदूतैर्महाघोरैर्नरके घोरसंज्ञके पातयामास देवेशि द्वाविंशति
सहस्रकं ८ वर्षसु भुज्यते देवि कृमिश्लेष्मीमुखैर्यतं नरकान्निःसृतो देवि व्याघ्रयोनिमजायत ९ पुनः छागस्य वै योनिं विडालस्य त

नभवेद्देवि कन्यापुत्रप्ररोधनं ११ अथ वा तस्य चोपायं शृणुमे परमेश्वरि प्रायश्चित्तं सुरेशानि पूर्वजन्मसमुद्भवं १२ गृहवित्तषडंशेन पञ्चदानं
प्रकल्पयेत् गायत्रीं त्र्यंबकाभ्यां च जातवेदेन चानघे १३ जपं वै कारयामास प्रतिमंत्रं दशायुतं ततो होमं दशांशेन तर्पणं मार्जनं तथा १४ पलंस
प्तसुवर्णेन ब्राह्मणस्य तदाकृतिं पूजयित्वा यथान्यायं ब्राह्मणाय ततो ददेत् १५ ततो गां कपिलां दद्यात्स्वर्णवस्त्रविभूषितां वृषमेकं वरारोहे दश
वर्णं ततो ददेत् १६ एवं कृते न संदेहो वंशमस्य भवेत्खलु रोगं शरीरजं न्यस्य तस्य नाशं प्रजायते १७ काकवंध्यालभेत्पुत्रं मृतवत्सा ततः प्रिये चिर थ
जीवीसुतं लेभे नात्र कार्या विचारणा १८ इति श्रीकर्मविपाकसंहितायां मूलनक्षत्रस्य प्रथमचरणस्य प्रायश्चित्तो नाम षट्सप्ततीतमोध्यायः
७६ श्रीशिव उवाच पश्चिमस्यामयोध्यातो योजनं वै त्रयोपरि राघवस्य पुरं देवि वसंती वहुयोजनाः १ तन्मध्ये ब्राह्मणाएको योगशर्मा ततः
प्रिये तस्य पत्नी समाख्याता गुणात्राप्रमदाशुभा २ तत्र वासो भवेद्देवि विज्ञानवान् चातिपंडितः पुरोहितो यदागेहे धनाढ्यः कृपणस्तथा ३ प्रतिग्रहे
ण भो देवि विस्मयं कुर्याद्दिने दिने तस्य भ्राता कनीयान्स व्यापारकरणे रतः ४ उभौ द्वौ ब्राह्मणौ देवि विप्रौ निमंत्रौ परस्परौ ततो वहुगते काले वैरयातंत
यो स्तदा ५ स्वधनस्य विभागार्थे युद्धं भवति दारुणं तदुद्देशेन भो देवि मृतो भ्राता कनीयसः ६ तद्धनं गृह्य तत्सर्वं तेन तद्विप्रेणोपहृतवान् दानं नैव कृ
तं देवि ततो वै मरणं भवेत् ७ यमदूतैर्महाघोरे निक्षिप्तं रक्तकर्दमे वहुमन्वन्तरसहस्राणि भुक्त्वा नरकयातनां ८ नरकान्निःसृतो देवि गर्ध
भत्वं प्रजायते वृकयोनिं ततो भूत्वा मानुषत्वं ततो भवत् ९ वैश्यविप्रारतो निस्यकन्या वान्पुत्रवर्जितः रोगयुक्तो महादेवि सदा चिंतायुतो नरः १०
पूर्वपापविशुद्ध्यर्थं प्रायश्चित्तं शृणुष्व तत् हरीवंशश्रवणं देवि शिवपूजनमेव च ११ षडक्षरं महामंत्रं गुरुस्य मम सुरेश्वरि जपं वै कारयामा
स दशलक्षं वरानने १२ अमायांपिंडदानं च गोदानं च विशेषतः होमं च कारयेद्देवि कुंडे चित्रमनोहरे १३ चतुरस्रे वरारोहे तिलधान्यादितंडु
लैः प्रतिमां कारयेद्देवि भ्रातुः स्वर्णस्य वै प्रिये १४ पलं दशप्रमाणेन मंत्रेणानेन पूजयेत् ॐ नमः सवित्रे देवाय वेदवेदांगपारगः १५ पूर्वज
न्मकृतं पापं मम सर्वं व्यपोहतु अज्ञानाद्वा प्रमादाद्वा भ्रातुरंशं मया हृतं १६ तदर्थं गोमयाद्वा ता साक्षीभूताय ते नमः प्रतिमां पूजयित्वा तु ब्रा
ह्मणाय प्रदेत्ततः १७ एवं कृते विधानेन शीघ्रं पुत्रमवाप्स्यसि काकवंध्या पुत्रवरं जनयामास भामिनि १८ व्याधयो नाश मा यांति कुलरा

नोभवत् मानुषत्वंततोलेभेदेवीपुत्रपणमेशुभे १० स्वकर्मवशगोनित्यं धनधान्यसमन्वितं गुणाढ्यःसर्वविद्यानांकन्यापुत्रप्रजायत ११
लवणकारस्यमरणंगंगायांपूर्वजन्मनः तत्फलेनमहादेवि धनाढ्यत्वंप्रजायते १२ स्वभार्यापतितादेविलवण कूपेनिशामुखे ननिः
सारिताच देवेशितनः कन्याप्रजाभवत् १३ वृषभोपतितोकूपेपातितोमृत्युमागतो तेनदोषेणदेवेशिपुत्रोनैवप्रजायते १४ परस्त्रिर
णिसंयोगंयत्कृतंपूर्वजन्मनि तेनपापेनभोदेविशरीरेरोगसंभवः १५ अस्यशांतिंप्रवक्ष्यामिशृणुदेविसुशोभने गृहवित्ताष्टमंभाग
ब्राह्मणायसमर्पयेत् १६ गायत्रीलक्षजाप्यंचविप्रद्वाराचकारयेत् हवनंतद्दशांशेनमार्जनंतर्पणंतथा १७ सुवर्णस्यकृतामूर्तिर्लक्ष्मी
पंचपलस्यतु रौप्यस्यैवतुवराहेवृषभोद्वौसुनिर्मलौ १८ पलदशस्यवैकुर्यात्पूजयित्वायथाविधिः मंत्रेणानेनदेवेशिचोपचारैःपृथ
क्पृथक् १९ ॐ लक्ष्मिदेविमहालक्ष्मिकमलेसर्वसिद्धिदे ममपूर्वकृतंपापंत्वंसमस्तंदयानिधे २० ॐ लक्ष्म्यैनमः पाद्यंसम० ॐ लक्ष्म्यै०
अर्घ्यंस० ॐ देव्यैनमस्नानं० ॐ कमलायै० गंधं० ॐ सर्वायै० धूपं० ॐ सिद्धिदायै० दीपं० पाद्यादिसर्वाणिदापयेत् ॐ नंदिकेश्वरमूलेशगा
णानामधिपोभवेत् ममपूर्वकृतंपापं क्षम्यतांपरमेश्वर २१ इतिमंत्रेणवृषभोपूजितोशुभरूपिणो पूजयित्वायथान्यायंब्राह्मणा
यदद्देत्ततः २२ ततोगांकपिलांदद्यात्स्वर्णशृंगीसुभूषितां एवंकृतेवरारोहे यत्कृतंपूर्वजन्मनि २३ तत्सर्वंनाशमायातिशीघ्रमेवनसंश
यः पुत्रोपिजायतेदेवि वंध्यात्वंचप्रशाम्यति २४ रोगाःसर्वेक्षयंयांतिनात्रकार्याविचारणा मृतवत्सालभेत्पुत्रंचिरंजीवीनसंतम २५॥
काकवंध्यालभेत्पुत्रंपुनर्देविनसंशयः २६ इतिश्रीकर्मविपाकसंहितायांमूलनक्षत्रस्यचतुर्थचरणप्रायश्चित्तोनामनवसप्तति
मोध्यायः ७९ श्री शिव उवाच तत्रायोध्यांमहादेविवशिष्ठस्यैवचाश्रमे धनेश्वरंचशर्मेतिब्राह्मणोवसतिप्रिये १ सपंडितोगुणज्ञ
श्च धनीमानीविचक्षणः स्त्रियापतिव्रतातस्यपतिसेवाचतत्परा २ पुत्रद्वयंतथाजातंविषयासक्तिजीवति भागिनेयस्ततोदेविनद्धनेश्वर
शर्मणः ३ तत्रवासार्थमायातःसहपत्नीवरानने तीर्थयात्राप्रसंगेनगृहेतस्यवसद्विजः ४ मासमेकंस्थितंतत्रभागिनेयस्ततोमृतः दैवकःसर्व
णदेवेशिकर्मकांडंतथाकृतं ५ वर्षमात्रेततोजातेभागिनेयस्यवैवधूः धनेश्वरेमहाप्रीतिर्जाताखलुवरानने ६ भार्यापुत्रंचवैरुध्यमसाहसायेनमहा

गृहे स्वर्णंचरोप्यंच सर्वंतस्यैन्यवेदयत् ७ ततो वहुगते काले तस्य मृत्युरभूत्किल यमदूतैर्महाघोरैर्नरके क्षिप्तवान्शिवे ८ यमाज्ञया वरारोहे षष्टिव
र्षसहस्रकं अन्यत्रापि कृतं पापं प्रयागे च विनश्यति ९ प्रयागे यत्कृतं पापं रामपूर्यां विनश्यति अयोध्यायां कृतं पापं वज्रलेपो भविष्यति १०
नरकान्निःसृतो देवि वकयोनिमजायत पुनर्दर्दुरयोनिर्वै काकयोनिं ततोभवत् ११ पुनर्मानुषयोनिर्वै धनधान्यसमन्वितं जाते पुन्यनमेदेशे द्रवगंध
र्षसेविते १२ सर्वविद्यासु विख्यातो गुणज्ञो रूपवांस्तदा पूर्वजन्मनि देवेशि भागिनेयवधूं प्रति १३ संभोगं कृतवान्विप्र कुक्षिपीडा ततः परं वंशच्छेदं
विशालाक्षि कन्यका वहवस्तथा १४ भागिनेयस्य वैद्रव्यमुक्तं पुत्रयुतं यतः शरीरे वहवा पीडा परस्त्रीगमनादनु १५ अस्य शांतिं प्रवक्ष्यामि श्रृ
णु त्वं मम वल्लभे गृहवित्तषडंशं च पुण्यकार्ये च कारयेत् १६ गायत्रीजातवेदाभ्यां जपं वै कारयेत्ततः दशांशं हवनं कृत्वा तर्पणं मार्जनं तथा १७ जी
र्णोद्धारं वरारोहे कूपं चैव तडागकं तद्देवं चैव कूर्यात्स्वष्टिवृक्षान्वरानने १८ प्रयागे माघमासे तु तुलादानं प्रयत्नतः धूम्रवर्णां तथा गां वै दद्याद्द्वि
जाय सत्कृतां १९ एवं कृते वरारोहे पूर्वपापं विमुच्यति पुत्रोपि जायते देवि वंध्यत्वं च प्रशाम्यति काकवंध्यत्वशाम्यैवैर विमुक्तां तु सप्तमीं कृत्वा
पत्नी वरारोहे सुवर्णदानमाचरेत् २१ शय्यादानं ततो दद्यात्तवत्सां सुपयस्विनीं सर्वरोगक्षयं याति नात्र कार्या विचारणा २२ इति श्री कर्मविपाकसं
हितायां पुर्वाषाढनक्षत्रस्य प्रथमचरणप्रायश्चित्तो नामत्र्यशीतितमोध्यायः ८० श्रीशिव उवाच कर्णाटे वै ततो देवि पुरं च शिवसंज्ञकं वसन्ति तं
च वहवो वैश्याः पण्योपजीविनः १ तन्मध्ये वैश्य एको हि धरणीकर विश्रुतिः तस्य रूपवती भार्या सुंदरी वहुसंमता २ व्यापारेण महादेवि धनं
वहु समन्वितं ततो वृद्ध दिने जाते तस्य मित्रो द्विजो ध्यभूत् ३ ब्राह्मणोसोपि वैश्यश्च कष्टं भुक्त्वा दिने दिने स्वर्णं शतपलं देवि हीरकं मौक्तिकं तथा ४
स्थापितं ब्राह्मणद्रव्यं स्वगृहे मित्रकारणात् ततो हृष्टेनु वैजाते वैश्यमृत्युरभूत्तदा ५ पश्चात्सती मृता तस्य व्रतिनी ताः वर्षार्जिता वैश्यस्यैव भवे स्वर्गे
दिव्यवर्षसहस्रकं ६ पत्न्या सह वरारोहे भुक्त्वा स्वर्गफलं ततः वकयोनिं ततो लेभे चक्रवाकस्ततोभवत् ७ हंसयोनिं ततो जातं मानुषत्वं ततो भवत् पू
र्वसंवंधतः पूर्वपुण्यप्रसादतः त्वनादपि ८ पुनर्विवाहितादेवि ब्राह्मणाय प्रदापयेत् वंध्या प्राणानानुसा नारी दुःखिता चाप्यहर्निशं ९ तस्य देहे भवेद्व्या
धिः कफवातसमन्विता धनाढ्या वहुधा कन्या जायते च पुनः पुनः १० अस्या ग्रहे हेत्वर्थं शृणु सर्वं वरानने पंचहेतिनमर्द्दं द्विब्राह्मणाय समर्पयत्

११ ॐ लक्ष्म्यै नमो यमंत्रेण दशायुतजपं ततः दशांशं हवनं तद्वत् तर्पणं मार्जनं तथा १२ गामेकां कृष्णवर्णां वै स्वर्णशृंगीं सवत्सकां ब्राह्मणाय ततो दद्या
न्मुक्तालांगूलग्रंथितां १३ भोजनं कारयामास ब्राह्मणान्वेदपारगान् शतं वा द्विशतं देवि त्रिशतं वा विशेषतः १४ पलं शतसुवर्णस्य देवीं कृत्वा वि
चक्षणः तन्मध्ये च द्विजस्यैव रौप्यस्यैव च वाकृतिं १५ पूजयामास देवेशि मंत्रेणैव पुनः पुनः ब्रह्मत्वं कपिलो विष्णुः सर्वसाक्षी जगन्मयः १६
ममापराधं देवेश क्षम्यतां पूर्वजन्मनः द्रव्यमन्यस्य भो देवि स्थापितं स्वगृहे मया १७ न दत्तं वै मया ज्ञानान्नष्टमस्तु परमेश्वर मंत्रेणानेन देवेशि
पूजनं विधिपूर्वकं १८ पूजयित्वा ततो देवि ब्राह्मणाय प्रदापयेत् एवं कृत्वा वरारोहे शीघ्रं पुत्रं प्रजायते १९ काकवंध्या पुनः पुत्रं कन्यकामजनीन
था पुत्रं प्रसूयते देवि न च कन्या प्रसूयते २० मृतवत्सा लभेत्पुत्रं चिरंजीविनमुत्तमम् व्याधयः संक्षयं यांति नात्र कार्या विचारणा २१ इति श्रीकर्मविपा
कसंहितायां पूर्वाषाढानक्षत्रस्य द्वितीयचरणप्रायश्चित्तो नाम एकाशीतितमोऽध्यायः ८१ श्रीशिव उवाच अंतर्वेदे विशालाक्षि द्विजो धीवसति
पुण्यकृत् गंधर्वपुरविख्याते नगरे यमुनातटे १ सभाग्यवान् गुणज्ञो हि वहुभृत्यैः सुपूजितः भूपतिस्तस्य देशस्य दाता भोक्ता विचक्षणः २ ब्राह्म
णास्सत्तनाभूमिरन्नानाहु सुरेश्वरि ब्राह्मणोपि विषं भुक्त्वा मृतः तस्योपरि प्रिये ३ ततो वहुगते काले तस्य मृत्युरभूत्सुरा यमदूतैर्महाघोरे कुंभीपाके
च क्षिप्तवान् ४ यमाज्ञया वरारोहे युगमेकं पपाच वै महादुःखेन संतप्तो वहुकष्टमलब्धवान् पुनरकान्निःसृतो देवि वृश्चिकत्वं प्रजायते सर्पयोनिं
ततो भूत्वा शुक्रयोनिं ततो भवेत् ६ पुनर्मानुषवै योनिं मध्यदेशे वरानने धनधान्यसमायुक्तो वंशहीनो वरानने ७ पूर्वजन्मनि देवेशि हता भूमिर्वरा
नने ब्राह्मणो वै मृतः पूर्वं तद्दोषेन वै शिवे ८ अतः पुत्रविहीनोयं कन्यकावहु जायते महारोगेन संतप्तो मृतवत्सा पुनः पुनः ९ अस्य शांतिमहं वक्ष्ये
पूर्वपापस्य शांतये गायत्रीं जातवेदाभ्यां त्र्यंबकेन वरानने १० दशायुतं जपः कार्यः प्रतिमंत्रैः सुरेश्वरी दशांशं हवनं तद्वत् तर्पणं मार्जनं तथा ११ दशा
वर्णं ततो दानं शतं ब्राह्मणभोजनं भूमिदानं ततो कुर्यात् शतविग्रहमानकं १२ पलं पंचसुवर्णस्य ब्राह्मणस्य तथाकृतिं पूजयित्वा यथान्यायं ब्राह्म
णाय प्रदापयेत् १३ प्रयागे मकरे मासि पत्नी सह वरानने स्नानं करोति देवेशि पूर्वपापं व्यपोहति १४ एवं कृत्वा वरारोहे पुत्रो जातः स वै शिवे वंध्य
१ त्वं नाशमायाति काकवंध्या च गुर्विणी १५ मृतवत्सा लभेत्पुत्रं चिरंजीवि नमुत्तमम् रोगाः सर्वे क्षयं यांति नात्र कार्या विचारणा १६ इति श्रीकर्मवि

कर्म. पाकसंहितायां पूर्वाषाढानक्षत्रस्य तृतीयचरणप्रायश्चित्तो नाम द्व्यशीतितमोऽध्यायः ८२ श्रीशिव उवाच अयोध्यायां विशालाक्षी माला-
३० कारी वसत्पुरा साधुवृत्तिरतः श्रीमान् ब्राह्मणानां च सेवकः १ तस्य पत्नी महादुष्टा कुलटा व्यभिचारिणी मा त्वं हत्वा विशालाक्षी जीवयामास
बांधवान् २ तस्य मित्रो द्विजो ह्येकः स्वर्णलक्षद्वयं तथा स्थापितं स्वगृहे देवि गतं च बहुवासरं ३ याचितं तेन स्वं द्रव्यमर्धं प्राप्तं तदा प्रिये तदर्धं च
व अर्पयं जातं मालाकारस्य वै गृहे ४ एवं बहुगते काले मालाकारो मृतः पुरा अयोध्यायां विशालाक्षी स्वर्गतस्य भवत्किल ५ लक्षवर्षं वरारोहे भु-
क्तं स्वर्गफलं शुभं ततः पुण्यक्षये याते मानुषत्वं भवेत्पुनः ६ मध्यदेशे च देवेशि पुत्रकन्याविवर्जितः तस्य पत्नी प्रनदे विपा स्थिता पूर्वजन्मनि ७
विवाहिता च सा देवि व्याधियुक्ता ज्वरातुरा अस्य शान्तिं वरारोहे शृणु मे परमेश्वरि ८ षडंगं पाठयामास शिवपूजनपूर्वकं षडक्षरेण मन्त्रेण ल-
क्षजाप्यं वरानने ९ हवनं तद्दशांशेन मार्जनं तर्पणं तथा श्रवणामास मे कंतु चंडिकाचरितत्रयं १० ततः षडंशं देवेशि ब्राह्मणाय समर्पयेत् ततो
गां कपिलां दद्यात् तिलधेनुं सुपूजितां ११ अश्वत्थानं विशालाक्षि महीषी दुग्धसंयुता सुवर्णस्य कृतं वृक्षं फलपुष्पसमन्वितं १२ पलं दशास्य वै दे-
वि ततः पुत्रः प्रजायते मृतवत्सा च या नारी काकवंध्या च रोगिणी १३ सर्वा सां वा धितं कार्यं जायते नात्र संशयः १४ इति श्रीकर्मविपाकसंहिता-
यां पूर्वाषाढानक्षत्रस्य चतुर्थचरणप्रायश्चित्तो नाम त्र्यशीतितमोऽध्यायः ८३ श्रीशिव उवाच श्वेतपर्वे महातीर्थे रामपूर्णावरानने का-
न्यकुब्जो वसद्विप्रो व्यापारकरणे रतः १ अश्वादिकं वरारोहे वृषचर्मार्जनावरं प्रत्यहं गृह्णते देवि विक्रियं क्रियते सदा २ द्यूतादेश्यारतो
नित्यं परस्त्रीगमनं तथा प्रकरोति सुरापानं गुरुदेवं न मन्यते ३ एवं बहुगते काले मरणं तस्य जायते यमदूतैर्महाघोरैर्व्याक्षिप्तं सुदारुणे
४ षष्टिवर्षसहस्राणि भुक्त्वा नरकयातनां नरकान्निःसृतो देवि वानरस्याभवेद्भुवः ५ ततो रासभयोनिं वै तुरंगस्तु ततोऽभवत् मानुषत्वं पुनर्लेभे पू-
र्वजन्मफलाघृतः ६ धनधान्यसमायुक्तो रोगयुक्तोऽप्यपुत्रकः कदाचिद्दैवयोगेन पुत्रं भवति भामिनि ७ मरणं तस्य वै शीघ्रं ततः कन्या प्रजायते अस्य
